॥ ओ३म् ॥
न कर्मणा लभ्यते चिन्तया वा
नाप्यस्ति दाता पुरुषस्य कश्चित् ।
पर्याययोगाद्विहितं विधात्रा
कालेन सर्वं लभते मनुष्यः ॥
( महाभारत, शान्तिपर्व - 25/5 )
कर्मभिः स्वैरवाप्तस्य जन्मनः
पितरौ यथा।
राज्ञां तथाऽन्ये राजस्य प्रवृत्तावेव
कारणम्॥
( राजतरङ्गिणी - 3/244 )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

सत्यनिष्ठा जयेल्लेखनी निर्भया

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत - संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
सुखं वा यदि वा दुःखं प्रियं वा
यदि वाप्रियम्।
प्राप्तं प्राप्तमुपासीत्
हृदयेनापराजितः॥
महाभारतम् ( शान्तिपर्व26.26 )
अतो हास्यतरं लोके
किञ्चिदन्यन्न विद्यते ।
यत्र दुर्जनमित्याह दुर्जनः सज्जनं स्वयम् ॥
( महाभारत आदिपर्व -74/94 )

卐 वर्षम्-१३ 卐 अंकः-२४ ( ३१२ ) नवदेहली 卐 १६ जूनमासः २०२४तः ३० जूनमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८


## ग्रन्थप्रकाशनम् अन्धकारं समाप्नोति- कुलपतिः प्रो. श्रीनिवासवरखेडी

दिल्ली,अजय कुमार मिश्रा , कुलपतेः अध्यक्षतायां केंद्रीय संस्कृत विश्वविद्यालय नई देहल्याः शोध प्रकाशन विभागम् उद्दिश्य देशे अवस्थितानां समस्त परिसराणां आदर्श महाविद्यालयानाम् आचार्यैः,



निदेशकैः शोधच्छात्रैश्छात्राभिः च सह औफ लाईन-औन लाईन माध्यमेन संस्कृत पुस्तक प्रकाशनं तेषां जनपर्यन्तं प्राप्तिः कथं स्यादिति विषयमालक्ष्य महत्त्वपूर्णगोष्ठी जाता।

शेषभागः द्वितीयेपुटे






## श्रीवैद्यनाथसंस्कृत पुस्तकालयेन ग्रीष्मकालीन-संस्कृत-सम्भाषण-शिविरायोजनम्

देवघर। श्रीवैद्यनाथसंस्कृतपुस्तकालयेन प्रतिवर्षमिव ग्रीष्मकालीन-संस्कृत-सम्भाषण-शिविरम् आयोजितं यस्य संचालकाः पंकजकुमारझा -पूजाझा-राजीवशंकरमहोदयाश्चासन् तस्य च समापन समारोहः जून मासस्य 9-10 दिनांके आयोजितः तत्रापि जून मासस्य 9 दिनांके स्व. पं. श्री व्यासदेवमिश्रमहोदयानां संस्मृतौ




अखिल- भारतीय-संस्कृत-कवि-सम्मेलनम् अपि आयोजितं यस्य आध्यक्ष्यं भूतपूर्व-कुलपतयः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य, महाकवयः, पद्मश्रीरित्युपाधिसमलंकृताः डॉ. अभिराजराजेन्द्रमिश्रचरणाः समवहन्, एतेषाम् आध्यक्ष्ये लक्ष्मी-देवी-शर्राफादर्शसंस्कृत-महाविद्यालयतः व्याकरणशास्त्रे निवृत्ताः प्रो.

शेषभागः द्वितीयेपुटे

## दयानन्दसेवाश्रमसंघद्वारा वैचारिकक्रान्ति- शिविरस्य समापनसमारोहः कृतः

न्यू दिल्ली (डॉ. बृजेशगौतमः) आर्यसमाज सेवायाः एकांशिका - अखिलभारतीयदयानन्दसेवाश्रम संघस्य तत्वावधाने 41तमस्य वैचारिक क्रांति शिविरस्य समापन समारोहः अद्य अंबेडकर इंटरनेशनल सेंटर नई दिल्ली इत्यत्र समाचरितः। यत्र जे बी एम ग्रुप निदेशकः सुरेंद्रकुमारआर्यः सार्वदेशिक सभायाः प्रधानश्री




सुरेशचंद्र आर्यः दिल्ली आर्य प्रतिनिधि सभाप्रधान श्री धर्मपालआर्यः, महामंत्री विनयआर्यः, अखिल भारतीय दयानन्द सेवाश्रम संघस्य महामंत्री श्री जोगिंदर खट्टरः, आर्य केंद्रीय सभायाः महामंत्री सतीश चड्डा , दीपक केडिया, योगराज अरोड़ा, (प्रधानः,आर्ष गुरुकुल यज्ञतीर्थ ,एटा), आर्य समाज एवं अखिल भारतीय दयानन्द सेवाश्रम संघस्य अधिकारिगणश्च उपस्थिताः । अवसरेस्मिन् दयानन्द मंजरी नामकस्य पुस्तकस्य विमोचनमपि जातम् । सममेव आर्य समाजस्य महिला स्वरोजगार योजनान्तर्गतं बह्वीभ्यो महिलाभ्यः 20000 रूप्यकाणां सहयोग राशिः प्रदत्तः। 1968 तमाद्वर्षाद् अखिल भारतीय दयानन्द सेवाश्रम संघः एतेषु क्षेत्रेषु समाजोत्थानकार्याणि कुर्वते । निरंतरं प्रतिवर्षम् आदिवासिनः प्रतिनिधीन् स्वावलंबिनः निर्मातुं शिक्षया सहैव तेभ्यः भारतीय संस्कृतेः ज्ञानं दीयते। एषा परंपरा गतेभ्यः 41 वर्षेभ्यः निरंतरं प्रचलति। देशस्य विभिन्न राज्येभ्यः प्रायेण शतशः छात्र-छात्राः दिल्लीस्थ गुरुकुले उसित्वा पठन्ति । आर्य समाजो मनुते यद् आदिवासिनो दुर्बलाः न सबलाः इत्येव स्वाभिमानिना समाजेन आधुनिक शिक्षायां मुख्यधारायां ते योजनीयाः। अस्यां शृंखलायां गत समये तीव्रताम् आनयन् अखिल भारतीय दयानन्द सेवाश्रम संघस्य महानुभावानां सहयोगेन पूर्वोत्तर भारतम् आरभ्य मध्यवर्तिनि दक्षिणे च भारते विद्यालयस्य बालकेन्द्रस्य च कार्यं प्रारभत। अस्य शिविरस्य माध्यमेन प्रशिक्षणं प्राप्य आदिवासिक्षेत्रस्य जनाः स्वीय ग्रामस्य जनान् बालकेंद्रमाध्यमेन शिक्षन्ते। भारतीय समाजस्य विभिन्नतायाम् एकतायाः सुन्दरम् उदहारणम् अस्मिन् शिविरे द्रष्टुं लभ्यते। अनया सामाजिक्या, आध्यात्मिक उन्नत्या सहस्रं जनान् संस्कृत्य आर्यसमाजः स्व कर्त्तव्य पालनं कुरुते।

# संस्कृतसम्भाषणशिविरस्य उद्घाटनवर्गः सम्पन्नः

आगरा। 05जून 2024 तमे दिनाङ्के संस्कृतभारत्याः व्रजप्रान्तस्य प्रबोधनवर्गः समुद्घाटितः। कमलानगर-सरस्वती- शिशुमन्दिरे वर्गस्य उद्घाटनं दीपप्रज्वालनेन संस्कृतभारत्याः पश्चिम-उत्तर-प्रदेशस्य




क्षेत्रसंगठनमंत्री मान्यवरः देवेन्द्रमहोदयः कृतवान् । अस्मिन् अवसरे स्वकीय अध्यक्षीय उद्बोधने प्रान्ताध्यक्षा प्रो० तुलसीदेवी अवोचत् यत् संस्कृतभाषायाः प्रचार- प्रसारस्य आवश्यकता अर्हर्निशं विद्यते। संस्कृतभारती एकमान्त्रं संगठनं दृश्यते यत् सर्वकारीयसहायतां विना समाजस्य बलेन बारती संस्कृतेः संरक्षणम् विदधाति । विशिष्टाथितिः दीनदयालगौ - अनुसन्धानस्य मंत्रिवर्यः श्रीमान् हरिशंकरमहोदयः अवदत् यत् संस्कृतं विना भारतीय संस्कृतेः कल्पनां कर्तुं वयं न समर्थाः। ब्रजप्रान्तमंत्री डॉ. धर्मेन्द्र अग्रवाल महोदयः प्रबोधनवर्गस्य प्रास्ताविकीं प्रस्तौतवान्। अस्मिन् अवसरे प्रान्तप्रशिक्षणप्रमुखः सतीशमहोदयः, ब्रजप्रान्तसंगठनमंत्री श्रीमान् नरेन्द्रभागीरथी , लक्ष्मीनारायणः , वर्गाधिकारी श्री रघुवीरजी, ओ३मप्रकाशबंसलजी, हरस्वरूपजी, डॉ .जगदीश शर्मा, गंगाधर अरोडा प्रमुखरूपेण उपस्थिताः आसन् । कार्यक्रमस्य संचालनं प्रान्तसहमंत्री , डॉ गौरवगौतममहोदयः कृतवान्। वर्गे एकोनचत्वारिंशत् शिक्षार्शिनः उपस्थिताः सन्ति।

# संस्कृतभारती-उत्तरक्षेत्रद्वारा क्षेत्रप्रशिक्षणवर्गः

हिमाचलप्रदेशस्य पौंटा साहिब इति स्थाने उत्तरक्षेत्रस्य (देहली हरियाणा पञ्जाबम् हिमाचलम् जम्मूकश्मीरम् लद्दाख च) प्रशिक्षणवर्गस्य शुभारम्भः जातः। एषः वर्गः 8 जूनतः 20 जूनपर्यन्तं




प्रचलिष्यति । अस्मिन् वर्गे 160 प्रशिक्षार्थिनः भागं वहन्ति । मुख्यातिथिरूपेण उपस्थितः आसीत् श्रीमान् चन्द्रशेखरः- माननीयः विभागसङ्घचालकः, राष्ट्रियस्वयंसेवकसङ्घः।

महोदयेन उक्तं यत् संस्कृतस्य संस्कृतेश्च रक्षणं वस्तुतः संस्कृतभारतीसङ्घटनं कुर्वदस्ति । विशिष्टातिथिरूपेण कैप्टन जगदीशसिंहः अटवालः उपस्थितः आसीत् । सः उक्तवान् यत् मयि दृढः विश्वासः अस्ति यत् संस्कृतं शीघ्रमेव जनभाषा भविष्यति । मुख्यवक्तृरूपेण संस्कृतभारत्याः अखिलभारतसहप्रशिक्षणप्रमुखः डॉ. सचिन कठाळेमहोदयः प्रशिक्षार्थिनां मार्गदर्शनं कृतवान्। महोदयः वर्ग सम्बोधयन् उक्तवान् यत् आगतवद्भिः अस्माभिः सर्वैः प्रतिक्षणं प्रशिक्षणम् इति सूत्रं सर्वदा स्मरणीयम्।

उत्तरक्षेत्रप्रशिक्षणप्रमुखः श्रीमान् कौशलकिशोरः वर्गस्य प्रास्ताविकम् उपस्थापयन् आगतान् सर्वान् शिक्षार्थीन् पठिनपरिश्रमं कृत्वा शिबिरसञ्चालने दक्षतां प्राप्तुं प्रेरितवान्।

कार्यक्रमस्य शुभारम्भः अतिथिनां द्वारा दीपप्रज्वालनेन प्रशिक्षार्थिनां द्वारा मन्त्रोच्चारणेन चाभवत् । अजयेन सरस्वतीवन्दना पवनेन एकलगीतं हरियाणाप्रान्तस्य प्रशिक्षणप्रमुखेण श्रीमता नवीनेन मञ्चसञ्चालं कृतम् । धन्यवादज्ञापनं डॉ. मीनाक्षीमिश्रा अकरोत् । अस्मिन् अवसरे क्षेत्रसङ्घनमन्त्री श्रीमान् नरेन्द्रकुमारः हिमाचलप्रान्तस्य सहमन्त्री डॉ ज्ञानेश्वरः प्रशिक्षणप्रमुखः डॉ मुकेशः प्रचारप्रमुखः डॉ सत्यदेवः देहलीप्रान्तस्य प्रशिक्षणप्रमुखः श्रीमान् आशुतोषः प्रचारप्रमुखः डॉ कृष्णमोहनपाण्डेयः हरियाणाप्रान्तस्य प्रचारप्रमुखः श्रीमान् सत्येन्द्रः जम्मूसङ्घटनमन्त्री ऋषिकुमारः समाजस्य अन्ये च गणमान्याः उपस्थिताः आसन् । कार्यक्रमस्य सम्पूर्तिः कल्याणमन्त्रेण अभवत् ।

प्रथमपुटस्य शेषभागः

# श्रीवैद्यनाथसंस्कृत पुस्तकालयेन....

विष्णुकान्तझावर्याः स्वकाव्यम् अश्रावयन् वैद्यनाथ-कमल-कुमारी-संस्कृत-महाविद्यालयस्य वेदाध्यापकाः पं. श्री चिन्तामणि कर्म्हे महाशयाः संस्कृत विषयमालब्य अथ भारत देशस्य प्रधानसेवकमभिलक्ष्य स्वकाव्यपाठम् अकुर्वन्। अस्मिन्नेवावसरे



सततसारस्वतसाधनसंरताः डॉ. अरविन्द कुमार तिवारी महोदयेन समसामयिकस्थितौ स्वकाव्यं संश्राव्य जनानां मनोमालिन्यमपहृत्य सभा विजिता, तत्र गोरक्षपुरादागताः डॉ. सन्तोष कुमार चतुर्वेदी महोदयाः स्वकोकिलकण्ठेन अतीव मनोहरं पद्यम् अवोचन् अत्रैव उत्तराखण्डतः समागताः डॉ. शम्भु कुमार शर्मा महाशयाः स्वकाव्यपाठम् अकुर्वन्, गिरीडीह-झारखण्डतः डॉ. विमलेन्दु त्रिपाठी महाभागाः स्वकाव्यपाठम् समपादयन् स्थानीय कविसु डॉ. गौतम कुमार राजहंसः, श्री सोमेश कश्यपः, श्री पंकज कुमार झा च कवयः स्व स्व काव्यं प्रास्तौत्। अन्ते च आध्यक्ष्यं संवहन्तः परमहितैषिणः आचार्याः डॉ. अभिराजराजेन्द्रमिश्रमहाशयाः स्वरचना त्रयेण सम्पूर्णं वातावरणं संस्कृतगीतमयं कृत्वा आनन्दवर्षणमकुर्वन्। 10 दिनांके च समापन समारोहस्य मुख्यातिथित्वपदमलंकुर्वाणाः पद्मश्रियः डॉ अभिराजराजेन्द्रमिश्रमहोदयाः त्रिघण्टां यावत् चित्रमिव स्थित्वा शिविरच्छात्राणां प्रस्तुतिं समालोकयन्। सम्भाषण शिविरे आहत्य 70 छात्राः आसन् । अस्मिन् शिविरे संगीत कार्यशाला अपि आयोजिता यस्याः संचालकाः श्री सौरभ पण्डितः, श्री अंशु झा, श्री अभय कुंजिलवारश्च आसन् अस्यां 30 छात्राः भागं समवहन् कार्यक्रमे प्रायः पंकज कुमार झा रचित-मौलिकगीतानाम्, अनुदितगीतानां , नाटकस्य च प्रस्तुतिर्जाता। शिविरे 10 दिवसात्मिका नृत्य कक्षा अपि प्रचलिता अस्याः संचालकः श्री चन्दन झा वर्यः आसीत् , यस्यां 10 छात्राः भागम् अगृह्णन् । समारोहामु साफल्यतां प्रति नेतुं पुस्तकालयस्य अध्यक्षाः श्रीसंजयझावर्याः, उपाध्यक्षाः श्रीअमरचांदपण्डिताः, कोषाध्यक्षाः श्रीसंजयमिश्रमहोदयाः, सचिवाः श्रीप्रकाशभारद्वाजवर्याः, उपसचिवाः श्री सुबोधझामहाशयाः, सदस्येषु - श्री हिमांशु झा, श्री मधुकरमिश्रः, श्री बबनपुरोहितवारः, श्रीमनीषमिश्रः, श्री सौरभ खवाड़े,सदृशाः समर्पकाः कार्यं वहन्तः आसन्। देवघरस्थ-वासुदेव-संस्कृत-प्रचार-समितेः अध्यक्षवर्याः श्रीमन्तः मनोजमिश्रमहोदयाः कार्यक्रमसाफल्यै अतीवसाहाय्यमकुर्वन् । मंच संचालनं च पंकज कुमार झा, पूजा झा समेत्य अकुर्वताम्।

प्रथमपुटस्य शेषभागः

# ग्रन्थप्रकाशनम् अन्धकारं...

कुलपतिः प्रो वरखेडी स्वीये अध्यक्षीयोद्बोधने कथितवान् यत् प्रकाशित ग्रन्थः अंधकार युगं समाप्नोति। भारत वर्षे कदापि अंधकार युगः नासीत्। केवलम् औपनिवेशिक मनोगता प्रकल्पना विद्यते।

कुलपतिना बलं दत्तं यत् आतिथ्य सत्कारः जन्मदिनम् इत्येषु अवसरेषु पुष्प गुच्छ प्रदानस्य परिपाटी निर्मिता वर्तते , तत्स्थाने ग्रन्थ गुच्छ प्रदानस्य श्रीगणेशः केंद्रीय विश्वविद्यालयेन



करणीयम्।

अस्मिन् उपवेशने अद्यश केन्द्रीय संस्कृत विश्वविद्यालयस्य 'संस्कृत विमर्श' नामिका यूजीसी सन्दर्भितायाः अन्ता राष्ट्रिय षाण्मासिक शोध पत्रिकायाः अद्यतन अंकः अपि विमोचितः। यस्य प्रधान संपादकः प्रो श्रीनिवास वरखेड़ी कार्यकारी संपादकः च डा गणेश ति. पण्डितश्च। डा पण्डितः केंद्रीय विश्वविद्यालयस्य प्रकाशनेन संबद्ध नवाचार योजनानां के विषये अवगमनं कारितवान् । पाली संस्कृत भाषायाः उद्भट विद्वान् प्रकाशन विभागस्य निदेशकः प्रो काशीनाथ न्यौपाने च उपस्थितेभ्यः सर्वेभ्यः विद्वद्भ्यः वाचिक स्वागतं कुर्वन्नुक्तवान् यत् भारतस्य बहवः महत्त्वपूर्ण संस्कृत पाली ग्रंथाः चीनराष्ट्रे पार्श्वे सन्ति , येषां सूची अस्मत्सकाशे नोपलब्धा। अतः केन्द्रीय संस्कृत विश्वविद्यालयाय यः स्वर्णिम कालः अस्ति तदवसरं वीक्ष्य तान् ग्रंथान् विज्ञाय संबद्ध शोध कार्यम् अत्यंतम् आवश्यकम्। तत्र आचार्यस्य व्रज किशोर त्रिपाठिनः पुस्तकं यस्य संपादनं प्रो सुकान्त कुमार मोहन्ती, संयुक्त निदेशकः कृतवान्। तस्यापि विमोचनं विहितम्।

कुलसचिवेन प्रो आर . जी. मुरली कृष्णेण गोष्ठीमहत्ता प्रतिपादिता यत्र विश्वविद्यालयेन संबद्धं 1970 तमस्य वर्षस्य एकं ड्राफ्ट तेन चर्चितम्। यस्मिन् संस्कृत भाषायां समाज विज्ञानं,भूगोलं रसायन शास्त्रम् इत्येतैः विषयैः संबद्धग्रंथान् संस्कृत भाषयापि प्रकाशयेदिति येन संस्कृते सन्निहित ज्ञान विज्ञानं प्रकाशे आनेतुं शक्येत। कुलपतेर्मार्गदर्शने सा भावना उन्नीयमाना लक्ष्यते।



# आगामिनि जूनमासीये २१ तमे दिनाङ्के अन्ताराष्ट्रिययोगदिवसस्य साफल्येन आयोजनहेतवे एका विचारगोष्ठी समायोजिता

हरिद्वारम्, 11 जून। भारतीयस्वाभिमानकार्यालयस्य मुख्यालये



योगदिनम् आधृत्य एका विशिष्टा गोष्ठी आहूता, यस्याः अध्यक्षता पतञ्जलियोगसमितेः मुख्यमहिला केन्द्रीयप्रभारिणी साध्वी देवप्रिया कृतवती। योगऋषेः रामदेवस्य दिङ्निर्देशेषु योगदिवसस्य आयोजनं पतञ्जलियोगपीठस्य द्वितीये प्रखण्डे विशालयोगभवने सुनिश्चितम्। । अस्मिन् वर्षे अन्ता राष्ट्रिययोगदिवसम् उपलक्ष्ये चर्चारूपेण नारीसशक्तिकरणाय योगः चितः। अस्मिन् अवसरे योगदिवसस्य पूर्वसज्जाहेतवे उपस्थिताः अधिकारिणः कर्मचारिणश्च स्वविचारान् अभिव्यक्तीकृतवन्तः।

गोष्ठ्यां पतञ्जलियोगसमितेः मुख्यकेन्द्रीयप्रभारी भ्राता राकेशः आगन्तुकानां, योगसाधकानां च आवागमनम्, गोष्ठी-व्यवस्था, आकस्मिकसेवा, सूक्ष्मजलपानम् इत्यनेकान् विषयान् उक्तवान्, योगदिवसस्य साफल्येन आयोजनं भवितुं शक्नुयात्। गोष्ठ्यां हरिद्वारम्, ऋषिकेशः , रूड़की, देहरादूनम् इत्येभ्यः क्षेत्रेभ्यः पतंजलियोगसमित्याः प्रभारीगणः सम्मिलिताः आसन्। अस्मिन् अवसरे पतञ्जलियोगसमितेः मुख्यकेन्द्रीयप्रभारी स्वामीपरमार्थदेवः अपि स्वविचारान् व्यक्तवान्। गोष्ठ्यां स्वामी आर्षदेवः, स्वामी बजरङ्गदेवः, स्वामी ईशदेवः, स्वामी तीर्थदेवः, स्वामी विनयदेवः इत्येते उपस्थिताः आसन्।

# केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)
56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058
दूरभाषसङ्ख्या – 011 -28524993, 28524995, 28520979, 28520966
अन्तर्जालपुटम् - www.sanskrit.nic.in

अधिसूचनायाःसंख्या - के.सं.वि./36014/विज्ञापनम्/एस्-I/2024-25/03 दिनाङ्कः – 10/06/2024

## संस्कृतसंवर्धनयोजनायाः अन्तर्गतं वित्तीयसहायताप्रदानार्थं वित्तवर्षम् 2024-25 इत्यस्य कृते अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्

संस्कृतसंवर्धनयोजनायाः अन्तर्गतं केन्द्रीयसंस्कृतविश्वविद्यालयस्य 05.05.2024 दिनाङ्कस्य अधिसूचना, भारतस्य विविधसमाचारपत्रेषु 09.05.2024 दिनाङ्के प्रकाशितम्, तथा 10.05.2024 दिनाङ्के विश्वविद्यालयस्य अधिसूचना इत्यस्य अनुगुणम् अधोलिखिताः केन्द्रीययोजनाः उपलक्ष्य सर्वकारेतरसंस्थाभिः/ स्वैच्छिकसङ्घटनैः/ संस्थाभिः/ विश्वविद्यालयैः/ प्रकाशकैः/ वैयक्तिकरूपेण/ छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालमाध्यमेन पञ्जीकरणम् | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1. | **संस्कृतशिक्षणम्** - पारम्परिकसंस्कृतपाठशालासु/ महाविद्यालयेषु/ सर्वकारीयविद्यालयेषु/ चतुष्पाठिसंस्थासु शिक्षणार्थं संस्कृताध्यापकानाम् अथवा आधुनिकविषयकाध्यापकानां व्यवस्था तथा आवासीयच्छात्रवृत्तिश्च । | 10.06.2024 | 31.07.2024 |
| 2. | **सम्मानराशिः** - अभावग्रस्तपरिस्थितिषु वर्तमानानां संस्कृतपण्डितानां कृते वार्षिकवृत्तिः । | | |
| 3. | **संस्कृतसंवर्धनाय कार्यक्रमाः गतिविधयश्च** - विभिन्नसंस्कृतसंवर्धनकार्यक्रमाणाम् आयोजनार्थं वित्तीयसहायता । | | |
| 4. | **संस्कृतपुस्तकानां प्रकाशनं सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च** | | |
| 5. | **शास्त्रचूडामणिः** - संस्कृतशास्त्रशिक्षणार्थं शास्त्रविदुषाम् अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगः । | | |
| 6. | **व्यावसायिकप्रशिक्षणम्** - पञ्जीकृतासु पारम्परिकसंस्कृतसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम् । | | |
| 7. | **छात्रवृत्तिः** - पारम्परिक-आधुनिकधारासु नियमितरूपेण नवमीकक्षातः विद्यावारिधिपर्यन्तं संस्कृतम्/ पालिं/ प्राकृतम् अधीयानेभ्यः छात्रेभ्यः छात्रवृत्तिः । | 05.06.2024 | 15.09.2024 |

**अवधातव्याः निर्देशाः**

आनलाईन- आवेदनार्थं नवीना एवं नवीकरण-सर्वकारेतरसंस्था/ स्वैच्छिकसङ्घटनम्/ संस्था/ विश्वविद्यालयः भारसर्वकारस्य अधोलिखिते पोर्टल-मध्ये पञ्जीकरणम् अनिवार्यरूपेण कुर्यात्।

- सर्वाः उच्चशिक्षासंस्थाः "All India Survey on Higher Education (AISHE)"इति पोर्टल-मध्ये पञ्जीकृताः भवेयुः। पञ्जीकरणार्थं लिंक विद्यते https://aishe.gov.in
- सर्वाः विद्यालयीयाः संस्थाः "Unified Digital Information on School Education (UDISHE+)" इति पोर्टल-मध्ये पञ्जीकृताः भवेयुः। पञ्जीकरणार्थं लिंक विद्यते http://udiseplus.gov.in
- सर्वाः सर्वकारेतरसंस्थाः(एन.जी.ओ) **"Darpan Portal of NITI Aayog"** इति पोर्टल-मध्ये पञ्जीकृताः भवेयुः। पञ्जीकरणार्थं लिंक विद्यते https://ngodarpan.gov.in

**प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकपत्राणि, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य अग्रेसरणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटम् www.sanskrit.nic.in/schemes अवलोकयन्तु ।**

अन्ये सर्वे नियमाः 09.05.2024 दिनाङ्के प्रकाशितायाः अधिसूचनायाः अनुसारं विद्यते।

हस्ता/-
निदेशकः(केन्द्रीययोजनाः)

# एटा-आर्षगुरुकुले श्रीमतः श्यौदानसिंहस्य अभिनन्दनं जातम्

स्नातक-पुनश्चर्या प्रशिक्षण शिविरे आदरणीयस्य श्री श्यौदानसिंहस्य अभिनन्दनं गुरुकुले एटायाम् अभवत्। सः तत्रत्यः स्नातकः अलीगढ़े वैदिकाश्रमस्य प्रमुखः अस्ति।

आर्यशिविरेषु सहजसरलरीत्या योगदर्शनस्य पाठं कारयति। गुरुकुले




प्रचलिते पुनश्चर्या शिविरे सः विद्यार्थिनः अतीव वात्सल्येन योगस्य सूत्राणि बोधितवान्। नवम्याः कक्षायाः पाठ्यक्रमे योगदर्शनस्य कांश्चन अंशान् निर्धारितवान्। तदीयसरलाजीवनचर्या प्रशंस्या । श्री श्यौदानसिंहः आश्वासितवान् यत् सः मध्ये-मध्ये गुरुकुलप्रवासं करिष्ये इति। अस्मिन् अवसरे कुलाधिपतिः आचार्यः डॉ.वागीशः,आर्ष गुरुकुलसमितेः मन्त्री डॉ.अवनीशकुमारः, स्नातकः अथ च भूतपूर्वच्छात्रपरिषदः आर्षगुरुकुल-यज्ञतीर्थस्य कार्यकारिणी-सदस्यः श्री हेमकुमारविद्यावाचस्पतिः, संयुक्तसचिवः राष्ट्रियकविः श्री संदीपः 'शजरः', आचार्यः विद्याव्रतकुमारः,डॉ.भीष्मदेवशास्त्री, योगेन्द्रकुमारः तथा संगीताचार्यः श्री नेत्रपालः (बरेली ),अध्वरेशकुमारः च उपस्थिताः आसन्। ज्ञातव्यम् अस्ति यत् उक्तशिविरं ६ जून तः १५ जून २०२४ पर्यन्तं गुरुकुलपरिसरे प्रचलति। अस्मिन् शिविरे विद्याध्ययनं कुर्वतां छात्राणां कृते साहित्यं, सङ्गीतं, कला, योगः, वेदपाठः, भाषणं, संस्कृतसम्भाषणम् इत्येषां विशिष्टं प्रशिक्षणं प्रचलति।




# सम्पादकीयम्

सम्मान्या: सुरभारतीसमुपासका:!

सादरं नमोनम:।

भारतीय संस्कृतिं परिभाषयन्ती गुरुकुल्य शिक्षा प्रणाली भारते प्रायेण 5000 ईश्वीत: पूर्व प्राचलत् स छात्र: गुरुकुले विभिन्न व्यावहारिक विषयान् अनुशासितं स्वस्थ जीवन महत्वं च शीक्षते स्म। उपनिषद: वेदा:इव हिंदू धार्मिक शास्त्रेषु गुरुकुल महत्वं वर्णितम्। अद्य आरभ्य केवलं शताब्दीद्वयात् पूर्व भारते प्रायेण 7:30 लक्षं गुरुकुलानि आसन्। परंतु वैदेशिकानाम् आक्रांतानां शासनेन एषां संख्या निरंतरं न्यूना जाता। अद्य स्वातंत्र्योत्तरेषु 77 वर्षेषु अतीतेषु सत्स्वपि भारते केवलं 4000 गुरुकुलानि जीवन्ति। आङ्ग्लशासनकाले ब्रिटिश विद्वान् मैकाले एतादृशी शिक्षा प्रणाली प्रवर्तयति, यया भारतीयानाम् एक: एतादृशवंशक्रम: जन्म प्राप्नोत् य: संस्कृतिं परंपरां प्रति हीन भावनया सह पल्लवित: जात:। ब्रिटिश शिक्षा नीते: उद्देश्यम् औपनिवेशिक शासनेन भारते मनोवैज्ञानिक तार्तन्त्र्य स्थापनम्। एकस्य षड्यंत्रस्य अंतर्गतं भारतस्य गुरुकुल प्रणाली नष्टा। अस्मद्राष्ट्रे अद्य आंग्लमाध्यमेन चिकित्सकस्य अभियन्तुर्निर्माणे च लक्षपरिमिता संख्या अस्ति, यद्यपि जीवनोपयोगिव्यवहारिक ज्ञानाय छात्र संख्या नगण्या। वस्तुत: गुरुकुल शिक्षा प्रणाली भारतीय शिक्षा पद्धते: प्रतीक:। मूल रूपेण गुरुकुलम् एतादृशविद्यालय: यत्र छात्र: गुरुभि: सह वसति। तदीय मार्गदर्शने शिक्षां, नैतिक मूल्यं , जीवन कौशलं च प्राप्नोति। शिक्षाया: इयं पद्धति: भारते युगेभ्य: चलति।

प्राचीन भारते गुरुकुलमेव अध्ययनाध्यापन केंद्रम् आसीत्। दूर-दूरत: ब्रह्मचारिविद्यार्थी अथ च सत्यान्वेषणे जिज्ञासव: स्वीय शिक्षां पूर्णीकर्तुं गुरुकुलानि आयान्ति स्म। भारते गुरुकुल शिक्षा पद्धते: महती परंपरा अवर्ततस गुरुकुलेषु शिक्षा मौखिक परंपरया दीयते स्म। गुरुकुले शिक्षा माध्यम: संस्कृत भाषा आसीत्।

भवदीया

सम्पादिका

।। वेद वाणी ।।

'मह्यं यजन्तु मम यानि हव्याकूति: सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता न: ।।
उरुव्यचा नो महिष: शर्म यंसदस्मिन्हवे पुरुहूत: पुरुक्षु: ।
स न: प्रजायै हर्यश्व मृळयेन्द्र मा नो रीरिषो मा परा दा: ।।

May the priests who perform, on my behalf, rituals relating to the sacrificial fire, offer oblations and prayers to Gods. May the purpose and prayer of my mind be sincere and true. May I not slip into any kind of sin. O ! Gods of Universe! Bless us.""May the omnipresent and most revered Lord Indra, who is worthy of being invoked by many performers of holy rituals, be present at our sacrificial fire and bestow joy upon us. May Lord Indra who is the master of green horses that draw His chariot, be gracious and kind to our children and grand-children . May He never harm us.May He never disown us.'

The Rig Veda 10.18.4&8

'सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् ।
अग्निर्न: पार्थिवेभ्य:।।
जोषा सवितर्यस्य ते हर: शतं सवाँ अर्हति ।
पाहि नो दिद्युत: पतन्त्या: ।।
चक्षुर्नो देव: सविता चक्षुर्न उत पर्वत: ।
चक्षुर्धाता दधातु न:।।
चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्य: ।
सं चेदं वि च पश्येम।।
सुसंदृशं त्वा वयं प्रति पश्येम सूर्य ।
वि पश्येम नृचक्षस: ।।'

May Lord Surya protect us from the tormentors in heaven.May Lord Vayu save us from those that trouble us from the firmament. And Lord Agni may safeguard from our enemies on earth.

May Lord Savitha, whose Effulgence is praised through hundreds of sacrificial fires, accept our prayers and salutations!Save us from the enemies' bolts that fall on us.

May Lord Surya Deva grant us the best of vision. May Parvata give us the best of vision. May Dhata bestow on us the best of vision.

O Lord Surya! Give brightness of vision to our eyes. Grant us ability to see our bodies with the help of the same. May we see the world in the best way with the vision granted by you.

May we have the best sight of Lord Surya Deva who is the giver of vision to all. Whatever men see in this world, may we discern the same in the best manner.'

The Rig Veda 10.158.1-5

संकलन : एस.वासुदेव राव:

# किरातार्जुनीयस्य काव्यशास्त्रीयं समीक्षणम्

-डॉ० बाबूलाल मीना

**"प्रतिभाव्युत्पत्तिमांश्च कवि: कविरित्युच्यते ।"**[१]

आचार्यस्य राजशेखरस्य अनेन वचनानुसारेण प्रतिभया व्युत्पत्त्या सम्पन्न: कविरेव वस्तुत:

कवि: भवति। वस्तुत: प्रतिभा एव सा बुद्धिरस्ति या नित्यं नूतनप्रकारविचारकल्पनानां जनयित्री-

**'प्रज्ञा नवनवोन्मेषशालिनीं प्रतिभां विदु:।**[२]

आचार्येण अभिनवगुप्तेनापि प्रतिभाया: व्याख्या इत्थं कृता-

**प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा, तस्या विशेषो रसावेशवैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वम्।'**[३]

इयं प्रतिभा जन्मजाता भवति। अध्ययनेन अभ्यासेन च नोत्पन्ना भवति। अस्या: कृते आचार्य: मम्मट: 'शक्ति:' इति शब्दं प्रयुक्तवान् कथितवान् च-

**शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।**[४]

मम्मट: शक्तिं कवित्वस्य बीजभूतं संस्कारविशेषं कथयति, यां विना काव्यं भवितुं नैवार्हति-

**शक्ति: कवित्वबीजरूप: संस्कारविशेष:, यां विना काव्यं न प्रसरेत्,**
**प्रसृतं वा उपहसनीयं स्यात्।**[५]

काव्यप्रकाशस्य टीकाकार: वामनाचार्य: झलकीकर: इमाम् ईश्वरस्य प्रसादं विलक्षणस्य भाग्यस्य वा प्रसादं मनुते।[६] वस्तुत: अपारे काव्यसंसारे ईदृशा: केचित् एव प्रतिभासम्पन्ना: युगप्रवर्तका: कवय: भवन्ति। शताब्दीषु एतादृशा: कवय: दृश्यन्ते। प्रतिभायुक्तानां कवीनां साहचर्येण विषयवस्तु सुशोभते, प्रकाशते कान्तिमत् च भवति। यद्दृष्ट्वा सहृदया: रसिका: आनन्दयुता: भवन्ति। भावकलापक्षयो: संयोगेन शब्दार्थगाम्भीर्येण, अलङ्काराणां सन्निवेशेन, रसपरिपाकेण, कथाया: नैरन्तर्येण च कवे: रचनायां रमणीयताया: सन्निवेशो भवति। काव्यस्य सौन्दर्यं वर्धते। कवि: स्वालौकिकप्रतिभया कथानके किञ्चित्परिवर्तनं कृत्वा पात्रचयनं, भाषाछन्दोविधानं, विलक्षणसूक्ती: अनुपमां शैलीं च सृजति।

महाकवि: भारवि: ईदृश: एव प्रतिभासम्पन्नो कविरस्ति। स: संस्कृतसाहित्यस्य देदीप्यमानेषु रत्नेषु अन्यतमो विद्यते। तस्य किरातार्जुनीयं महाकाव्यं वृहत्त्रय्या: प्रथमं बहुमूल्यं रत्नमस्ति। भारवि: भाषाभावयो:, रसपरिपाकस्य, वर्णनवैचित्र्यस्य, अलङ्कारप्रयोगस्य, विविध छन्दोयोजनाया: शास्त्रियस्य पाण्डित्यस्य च रमणीय: निदर्शनभूतोऽस्ति। तद्भाषायां प्रौढता, ओज:, प्रवाह: शक्तिमत्ता च प्राप्यन्ते। तस्य शब्दसंचय: भावानुकूल:। भावानुसारं क्वचित् प्रसाद:, क्वचित् माधुर्यं, क्वचिच्च ओज: प्राप्यते। भाषायां शैथिल्यस्य पूर्णाभावो विद्यते। किरातार्जुनीयं मनोभावानाम्, उदात्तकल्पनानां विचारगाम्भीर्यस्य च एकं रत्नाकरभूतमस्ति । अर्थगाम्भीर्यस्य अर्थगौरवस्य च यावती प्रशंसा क्रियेत तावती स्वल्पा एव। पदे पदे अर्थगौरवं तद्वैदुष्यस्य परिपक्वचिन्तनस्य च परिचायकम्।

भारवि: सर्वरसाणां कुशलतया निर्वहनं करोति। शृङ्गारवीररसयो: तस्य अतीव रुचि:। अलङ्कारप्रयोगे तु स: कुशल: एव। पञ्चदशे सर्गे चित्रालङ्काराणां प्रयोग: दर्शनीय: एव। वस्तुत: भारवि: संस्कृतकाव्यकारेषु रीतिशैल्या: जनक: मन्यते। तत्प्रकृतिचित्रणम् अतीव प्रशंसनीयं मनोहारि च। स: विविधछन्दसां प्रयोगेण कविताकामिन्या: सौन्दर्यं वर्धितवान्।

वस्तुत: तस्य काव्यसौन्दर्यं नारिकेलफलसम्मितं कथ्यते। वेद-उपनिषद्-दर्शन-पुराण-नीति-राजनीति-भूगोल-कृषि-कामशास्त्रादिसम्बद्धानि तद्वर्णनानि तत्पाण्डित्यस्य सूचकानि सन्ति। **'भारवेरर्थगौरवम्' 'भारवेरिव भारवे:' 'प्रकृतिमधुरा भारविगिर:'** इत्यादय: सूक्तय: वस्तुत: महाकवे: भारवे: गरिमाणं प्रकटयन्ति वर्णयन्ति सूचयन्ति च। तत्काव्यशास्त्रियं वैशिष्ट्यम् अत्र संक्षेपेण प्रस्तूयते- महाकवि: भारवि: स्वयमेव स्वविचारान् स्वकविताविषये प्रस्तौति-

**स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।**
**रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्।।**[७]

अयं श्लोकस्तु युधिष्ठिरेण भीमसेनस्य शान्ताय प्रयुक्ता चाटूक्ति: किन्तु अनेन महाकवे: पदावल्या: अर्थगौरवस्य च विषये संकेता: प्राप्यन्ते। महाकवे: उक्तौ पदेषु प्रसाद: विद्यते, अर्थगौरवमस्ति। सहप्रसंगेन मुख्यस्य अभिधेयस्य तिरोभाव: नास्ति, सममेव एकस्य भावस्य पुनरुक्ति: न। अस्यैव भावस्य समर्थनं कुर्वती पंक्ति: प्राप्यते-

**विविक्तवर्णाभरणा सुखश्रुति: प्रसादयन्ती हृदयान्यपि द्विषाम्।**
**प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ।।**[८]

किरातार्जुनीयस्य अनुशीलनेन ज्ञायते यत् महाकवि: भारवि: काव्यशास्त्रीयाणां तत्त्वानां रसालङ्कारादीनां साफल्येन प्रयोगं कृतवान्। काव्यशास्त्रीयतत्त्वेषु रसम् आचार्या: काव्यात्मानं मन्वते। भरत: मुनिस्तु कथयति एव यत्- 'न हि रसादृते कश्चिदर्थ: प्रवर्तते।[९] आचार्य: विश्वनाथोऽपि **''वाक्यं रसात्मकं काव्यम्''**[१०] इति कथयित्वा रसम् एव काव्यप्राणभूतं काव्यजीवितत्त्वं वा स्वीकरोति । शारदातनयस्तु भारवे: वाण्यां भावरसयो: तादात्म्यम् अङ्गीकरोति-

**'तादात्म्यं भावरसयो: भारवि: स्पष्टमूचितवान्।'**[११]

महाकवि: भारवि: किरातार्जुनीये महाकाव्ये अङ्गीरूपे वीररसं वर्णितवान्। अत एव तट्टीकाकार: मल्लिनाथोऽपि लिखति यत्-

**शृङ्गारादिरसोऽङ्गमत्र विजयी वीर: प्रधानो रस:।**[१२]

तत्काव्ये वीररसस्योपनिबन्धनम् अर्जुनस्य, शिवस्य, शिवसेनावीराणां माध्यमेन एव संजातम्। वीररसभेदेषु स: प्राधान्येन युद्धवीरस्य वर्णनं कृतवान्। धर्मवीरान्तर्गते अर्जुनस्य तपश्चर्याया: सन्निवेशो भवति। दानवीरस्य दयावीरस्य च वर्णनानि तत्र न प्राप्यन्ते। युद्धवीररस: शस्त्रप्रधानरूपे बुद्धिप्रधानरूपे च अत्र प्राप्यते। यथाहि प्रथमे सर्गे वनेचर: दुर्योधनस्य मनोभावान् युधिष्ठिरस्य सम्मुखे प्रस्तूय तस्मै स्वपौरुषस्य प्रकटनार्थं कथयति।[१३] एवमेव द्रौपद्या: वचनेषु अपि, यत्र द्रौपदी युधिष्ठिरस्य क्रोधोद्योगयो: संवर्धनानि वचनानि वक्ति।[१४] एवमेव द्वितीये सर्गे भीमवचनेषु अपि।[१५] शस्त्रप्रधानयुद्धवीरस्य रसस्य रमणीय: परिपाक: महर्षे: व्यासस्य वचने प्राप्यते, यस्मिन् व्यास: अर्जुनोत्साहं वर्धयन् युधिष्ठिरं कथयति ।[१६] एवमेव अर्जुनस्य किरातवेषधारिणा शिवेन सह युद्धे।[१७] अङ्गभूतेन शृङ्गाररसेन वीररसस्य परिपुष्टिरपि नैकेषु स्थलेषु प्राप्यते, यत्र अप्सरसां विविधा: चेष्टा: अर्जुनस्य दृढसंकल्पितस्य समक्षं विफलीभवन्ति। फलत: अर्जुनोत्साह: वर्धते।[१८]

महाकवि: भारवि: अङ्गरूपे शृङ्गाररसं निबद्धवान् प्रधानतया। अस्मिन्नपि संभोग: श्रृङ्गार: प्रमुख:। अत्र रते: आलम्बनभूता: अप्सरस:, गन्धर्वादय: उद्दीपनरूपास्तु षड् ऋतव:, सन्ध्या-रजनी-तमश्चन्द्रोदयादय: सन्ति। वस्तुत: अस्य रसस्य अभिव्यक्ति: अनेकेषु स्थलेषु स्पष्टत्वेन प्राप्यते ।[१९] मूलत: अयं किरातार्जुनीयस्य अष्टमे, नवमे, दशमे च सर्गे अङ्गरूपे निबद्धोऽस्ति। स: च अर्जुनस्य संकल्पं तेजस्वितां च विवधयति, अत: वीररसधारा तत्रापि

अविच्छिन्ना सती प्रवहति। एवमेव च वीभत्स रस:[२०], भयानक: रस:[२१] रौद्ररस:[२२] अद्भुत: रस:[२३], शृङ्गाररसाभास:[२४] भावध्वनि:[२५] संचारिभावचित्रणम्[२६] अपि स्थानेषु स्थानेषु प्राप्यन्ते अन्ये अङ्गभूता: रसा:। एवमेव द्रौपद्या: कथनेषु करुणस्य रसस्य प्रथमे सर्गे अल्पा निष्पत्ति:। यदा सा पाण्डवानां शौचनीयां दशां वर्णयति।

तृतीये सर्गे महर्षे: व्यासस्य अवतरणे शान्तरस: प्राप्यते। दशमे सर्गे इन्द्रस्य प्रबोधनेऽपि शान्तस्य रसस्य सन्निवेश: अभवत् । संक्षेपे अस्मिन् महाकाव्ये आरम्भत: अन्तपर्यन्तम् उत्साहस्थायिभावात्मकस्य वीररसस्य अजस्त्रा धारा तरङ्गिता, परन्तु सर्वत्र स्थानेषु च अन्येषाम् अङ्गभूतानां भयानकादीनां रसानां समावेश: सफलतया प्राप्यते।

महाकवि: भारवि: विविधछन्दसां प्रयोगे निपुण: । तच्छन्दोज्ञानं विस्तृतं विद्यते। तत्प्रियं छन्दोऽस्ति वंशस्थम् तेन स्वमहाकाव्यस्य अधिके भागे अस्य एव छन्दस: प्रयोग: विहित:। किरातार्जुनीयस्य चतुर्थे भागे एकं छन्द: इदम्। मूलत: प्रथमे, चतुर्थे, अष्टमे, चतुर्दशे च सर्गे इदमेव छन्द: उपनिबद्धम्। महाकवि: क्षेमेन्द्रोऽपि वीररसाय वंशस्थम् एव उपयुक्तं मनुते-

**षाड्गुण्यप्रगुणा नीतिर्वंशस्थेन विराजते।**[२७]

किरातार्जुनीये वीररसस्य वर्णनेषु उपनिबद्धस्य वंशस्थनाम्न: छन्दस: उत्कृष्टतां दृष्ट्वा क्षेमेन्द्रस्तु स्वग्रन्थे सुवृत्ततिलके एवमेव कथितवान्-

**वृत्तच्छत्रस्य सा कापि वंशस्थस्य विचित्रता ।**
**प्रतिभा भारवेर्येन, सच्छायेनाधिकीकृता ।।**

वंशस्थानन्तरं द्वितीये स्थाने तत्प्रियं छन्द: उपजाति:, तदनन्तरम् अनुष्टुप्। सर्गान्ते प्राय: बसन्ततिलका-मालिनीछन्दसो प्रयोग: परिलक्ष्यते। स: स्वमहाकाव्ये पञ्चविंशतिछन्दसां प्रयोगं विहितवान्। पञ्चमे सर्गे तु स: चतुर्दशछन्दसां प्रयोगं कृतवान्। तानि इमानि सन्ति – द्रुतविलम्बितम् (५/१६), औपच्छन्दसिकम् (५/१७), क्षमा (५/१८), प्रमिताक्षरा (५/२०), प्रभा (५/२१), रथोद्धता (५/२२), जलधरमाला (५/२३), प्रहर्षिणी (५/२६), जलोद्धतगति (५/२७), बसन्ततिलका (५/२८-३०), पुष्पिताग्रा (५/३२), शालिनी (५/३६), वंशपत्रपतितं (५/४३), मालिनी (५/५२) । एवमेव अष्टादशे सर्गेऽपि सप्तदश छन्दांसि प्रयुक्तवान् यत् भारवे: विविधछन्दोविषयकस्य ज्ञानस्य निदर्शनमस्ति। भारवि: प्रचलितछन्दोभि: सहैव औपच्छन्दसिक-अपरवक्त्र-जलोद्धतगति-चन्द्रिका-मत्तमयूरादिनां दुर्लभानाम् अप्रचलितानां च छन्दसां प्रयोगं कृत्वा स्वरचनासामर्थ्यं प्रकटितवान्। कानिचित् छन्दांसि तु स: एकवारमेव प्रयुक्तवान् स्वमहाकाव्ये यथा- जलधरमाला-प्रभा-जलोद्धतगति:, वंशपत्रपतितम्, मत्तमयूरम्, अपरवक्त्रम्। अनेन विवेचनेन ज्ञायते यत् भारवि: एव प्रथम: महाकविरस्ति, य: छन्दोवैविध्यं महाकाव्ये प्रदर्शितवान्, यत् तस्य पाण्डित्यस्य विचित्रमार्गस्य च परिचायकमस्ति । स: न केवलं छन्द:शास्त्रज्ञाता अपितु तत्प्रयोगेऽपि निपुण: पटु: वा आसीत्।

अलङ्कारयोजनाया: विषये स: स्वमहाकाव्ये विविधानाम् अलङ्काराणां प्रयोगं कृतवान्। तत्प्रियोऽलङ्कारोऽस्ति अर्थान्तरन्यास:।

शेषभाग:पंचमपुटे

चतुर्थपुटस्य शेषभागः **किरातार्जुनीयस्य काव्यशास्त्रीयं...**

कालिदासानन्तरम् अर्थान्तरन्यासस्य सः एव कुशलः प्रयोगकर्ता। किरातार्जुनीयस्य प्रथमे द्वितीये च सर्गे सः अर्थान्तरन्यासम् अन्यसर्गापेक्षया अधिकतया प्रयुक्तवान्।[२८] अलङ्कारेषु द्वितीये स्थाने उत्प्रेक्षायाः, तृतीये स्थाने उपमायाः प्रयोगं कृतवान्। महाकविः पञ्चमे सर्गे कमलपरागसौन्दर्यवर्णनप्रसंगे उपमायाः रमणीयां योजनां कृतवान। यक्षः अर्जुनं सम्यक् अवगमयति–

**उत्फुल्लस्थलनलिनीव नादमुष्मादुद्धतः सरसिजसम्भवः परागः ।**
**वात्याभिर्वियति विवर्तित समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम्।।**[२९]

महाकविः अनया उपमया एव संस्कृतकाव्यजगति 'आतपत्र' इति उपाधिना विभूषितः। एवमेव दार्शनिकी वैयाकरणी च उपमा अपि प्राप्यते।[३०] वस्तुतः भारविः एतद्व्यतिरिक्तानां शब्दार्थालङ्कारेषु अन्येषामपि अलङ्काराणां सफलतया प्रयोगं विहितवान् यथा– रूपकम् (2/50, 4/3, 11/4), अतिशयोक्तिः (3/60, 9/4, 12/7), श्लेषः (1/24, 13/14–15, 15/65), एकावली (2/32), समासोक्तिः (2/36, 3/60), दृष्टान्तः (2/50, 15/15), अर्थापत्तिः (7/27), विरोधाभासः (18/41)। एतद्व्यतिरिक्तं चित्रकाव्यप्रयोगे भारविः संस्कृतसाहित्यस्य प्रथमः कविः। सः एव चित्रालङ्काराणां प्रयोगं साफल्येन विहितवान् स्वमहाकाव्ये। सकलः पञ्चदशः सर्गस्तु चित्रालङ्कारैः चित्रितः। चित्रालङ्कारेषु क्वचित् एकाक्षर-श्लोकाः[३१], क्वचित् द्व्यक्षर-त्र्यक्षर-चतुरक्षराः श्लोकाः सन्ति ।[३२] क्वचित् पादादियमक[३३], क्वचित् पादान्तादियमकम् ।[३४] क्वचित् गोमूत्रिका बन्धोऽस्ति ।[३५] क्वचित् सर्वतोभद्रम् ।[३६] क्वचित् एकः एव श्लोकः सरलः विपरीतः च एकः एव भवति ।[३७] क्वचित् श्लोकस्य पूर्वार्द्धः उत्तरा एव।[३८] क्वचित् पदद्वयं समान[३९] तर्हि क्वचित् पदचतुष्टयम् एकमेव ।[४०] क्वचित् आद्यन्तयमक[४१], क्वचित् तु श्रृङ्खलायमकम्[४२]। क्वचित् निरोष्ठयवर्णश्लोकः ।[४३] तर्हि क्वचित् अर्धभ्रमकं।[४४] क्वचित् द्व्यर्थकश्लोकः[४५], त्र्यर्थकश्लोकः [४६], तर्हि क्वचित् चतुरर्थकश्लोकः[४७] प्राप्यते। एवम् अलङ्काराणां स्वाभाविकः परिश्रमसाध्यश्च प्रयोगः प्राप्यते भारवेः महाकाव्ये। इत्थं भारविः बौद्धिकव्यायामेन चित्रालङ्काराणां प्रयोगं कृत्वा संस्कृतभाषायाः तत्क्षमतायाः प्रकर्षं प्रदर्शितवान् यत् संसारस्य अन्यासु भाषासु सुदुर्लभम्। अत एव भारविः अलङ्कृतशैल्याः जनकः प्रवर्तकः कथ्यते यतोहि तत्पूर्ववर्तिनः महाकवयः स्वकाव्येषु भावपक्षस्य प्राधान्यं प्रस्तुतवन्तः। तत्परवर्तिनः महाकवयः ततः एव प्रेरणां संगृह्य कलापक्षं प्राधान्येन वर्णितवन्तः । अनने ज्ञायते यत् भारविः विविध ालङ्कारविषयज्ञानेन परिचितः आसीत्।

वस्तुतः भारविः वैदर्भीरीतेः महाकविः। संस्कृतकाव्यविकासे यद्यपि भारविः कलापक्षस्य प्रारम्भकः कथ्यते तथापि तन्महाकाव्यं समासबहुलतया आडम्बरयुक्तपदैः च न बहुक्लिष्टं जातम्। अस्य काव्यस्य रीतिः वैदर्भी एव कथनीया, यद्यपि अस्मिन् महाकाव्ये कालिदासवत् माधुर्यव्यञ्जकवर्णानाम् अधिकता नास्ति यतोहि वीररसानुकूलाः न वर्णाः सन्ति ईदृशाः, तथापि अल्पसमासयुक्तपदानां रचनायाः बाहुल्येन अस्य रीतिः वैदर्भी एव। द्रौपद्याः निम्नलिखितानि वचनानि ओजोयुक्तानि निश्चयेन वैदर्भीरीतौ स्थानं गृह्णन्ति–

**पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम्।**
**भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता।।**[४८]

परन्तु युद्धस्य अधोलिखिते वर्णने निश्चयेन गौडीरीतेः सौन्दर्यं विद्यमानमस्ति–

**जलौघसम्मूर्च्छनमूर्छितस्वनः प्रसक्तविद्युल्लसितैधृतद्युतिः ।**
**प्रशान्तिमेष्यन्धृतधूममण्डली बभूव भूयानिव तत्र पावकः ।।**[४९]

एवमेव अन्ये श्लोकाः अपि गौडीरीतेः निदर्शनभूताः [५०] केचित् विद्वांसः कथयन्ति यत् भारवेः शैली न तु गौडीरीतेः न एव वैदर्भीरीतेः अनुसरणं करोति अपितु सा द्वयोर्मध्ये भवितुमर्हति[५१]।

वस्तुतः भारवेः काव्यम् ओजोमयं विद्यते तथापि भारवेः शैल्याम् ओजः प्रसादमाधुर्याणाम् एतेषां त्रयाणां गुणानां सुन्दरः समन्वयः अभवत्। वीररसस्य प्रसङ्गेषु वनेचरस्य, द्रौपद्याः भीमसेनस्य कथनेषु ओजोगुणः चरमे उत्कर्षे भवति । यथाहि किरातार्जुनयोः युद्धवर्णने[५२]। शृङ्गाररसयुक्तेषु प्रसङ्गेषु सुभाषितेषु च प्रसादस्य माधुर्यस्य च समावेशः प्राप्यते। अन्यच्च, स्वयमेव भारविः स्वशैलीं प्रसादगुणयुक्ताम् अर्थगाम्भीर्यसम्पन्नां कथितवान् ।[५३] शृङ्गाररसवर्णने प्रकृतेः रमणीयचित्रणेषु माध ुर्यगुणव्यञ्जकानां प्रयोगः प्राप्यते।[५४]

इत्थं किरातार्जुनीये वर्णितानाम् उपर्युक्तानां रसछन्दोलङ्कार-रीति-गुणादीनां वैचित्र्येण अलङ्कारनिबद्धवर्णनशैल्याः विस्तृतविवेचनेन च एतत् स्पष्टं भवति यत् भारविः विविधशास्त्रनिष्णातः सन् काव्यशास्त्रीयतत्त्वानामपि विशेषज्ञो महान् ज्ञाता आसीत्। तत्किरातार्जुनीयं काव्यशास्त्रीय- तत्त्वदृष्ट्या एकं रमणीयं पाण्डित्यमयं काव्यस्य सर्वाङ्गोपेतं च महाकाव्यं विद्यते ।

सन्दर्भसूची


१. काव्यमीमांसा, अध्याय-५
२. ध्वन्यालोकटीका, पृ० ५५
३. ध्वन्यालोकलोचनटीका, पृ. ९३-९४
४. काव्यप्रकाशः, प्रथम उल्लासः, कारिका- ३
५. काव्यप्रकाशः, प्रथम उल्लासः, कारिका ३, वृत्तिभागः
६. काव्यप्रकाशः, प्रथम उल्लासः, कारिका- ३, झलकीकरटीका


# पुनः कदाचित्

## गोपबन्धुमिश्रः

दूरभाषध्वनिः। पुत्रस्य अनिकेतस्य स्यात् दूरभाषः। अद्य ततः प्रस्थाय श्वः

अत्र प्राप्स्यतीति सूचना स्यात् । सुशीला दूरभाषम् उदनाययत्। 'हरिः ओम्, वत्स!' सुशीला सोत्कण्ठम् अवदत्। 'भवत्याः दूरभाषः सम्यक् अस्ति? दूरभाषविभागतः वदामि।' अपरस्मात् प्रदेशात् ध्वनिः आगतः ।

'सम्यग् अस्ति, महोदय! धन्यवादः ।' सुशीला दूरभाषम् अवानाययत्। अद्यापि दूरभाषा नागता अनिकेतात। वारद्वयं प्रत्यहम् इव अद्यापि सुशीलया दूरभाषा कृता, ध्वनिः तु गतः। न उन्नायितवान् अनिकेतः । कार्ये संलग्नः स्यात् ।

आवासगृहं परिवर्तनीयम् इत्यतः वस्तूनां पुटीकरणं नयनम् इत्यादि कर्म करणीयम्। भवत्याः अस्मिन् अवसरे यत्नं विधातुं किञ्चित् असौविध्यं भवितुम् अर्हति। अतः केवलम् एकसप्ताहं यावत् अस्मिन् वृद्धाश्रमे वसतु। ततः स्वयम् अहम् आगत्य भवतीम् इतः नेष्यामि। इत्युक्त्वा अनिकेतः इतः गतः। सप्ताहः अतीतः। पञ्चदश दिनानि जातानि। नायातः सः। दूरभाषायां कृतायां सामान्यतः व्यस्तध्वनिः आगच्छति। कदाचित् उन्नाययत्यपि अनिकेतः, वदति– इदानीं कार्ये व्यग्रः अस्मि, अहं शीघ्रम् एव आगच्छामि। किञ्चित् धैर्य धरतु मातः ! इत्येवम् उक्त्वा उत्तरम् अप्रतीक्ष्य दूरभाषाम् अवनाययति।

'सुशीलावर्ये! आशां त्यजतु। वृद्धाश्रमम् इमं स्वगृहम् इति निश्चिनोतु।' समानवयाः अशोकधरः स्मितं हसित्वा अवदत् ।

'नहि, नहि ! न मे पुत्रः तथा। सः अवश्यम् आगमिष्यति। मां नेष्यति इतः। अहं न स्थास्यामि अत्र।'

'सर्वेऽपि अत्र आगमनकाले एवं वदन्ति । किन्तु तान् इतः पुनः नेतुं कोऽपि न आगच्छति। हां, प्रबन्धस्य कृते धनं वृद्धाश्रमं प्रति अवश्यं प्रेषयन्ति समयेन।' 'नहि, एषा भवतः कथा स्यात् । न मम। भवान् मह्यम् ईर्ष्यति। अतः एवं बति।श सुशीलायाः मुखे सम्भावनायाः किरणाः विकीर्णाः ।

'सुशीलावये ! अहं तु कामये एव भवत्याः पुत्र आगच्छेद् इति। किन्तु एषा आशा...। एषा आशा प्रतीक्षां जनयति। प्रतीक्षा पीडां जनयति। पीडया अनास्था, अनास्थया अशान्तिः। किं च अशान्तस्य कुतः सुखम्?' अहसत् अशोकधरः ।

मौनम् आचरत् सुशीला।

आत्मनि प्रत्ययो न भवति सुशीलायाः। संसारे एवं भवतीति श्रुतम् आसीत्, किन्तु अनिकेतोऽपि तथा भविष्यतीति अवधारणा एव नासीत् तस्याः। नहि, नहि... अपरं किमपि कारणं स्यात्। अनिकेतः एवम् एव माम् अत्र परित्यक्तुं न शक्नोति। पुनरपि सुशीला आश्रमस्य दूरभाषात् दूरभाषम् अकरोत् दीर्घकालं यावत्

ध्वनिः गच्छति स्म अपरं पार्श्वम्। अन्ततः अनिकेतः उदनाययत् दूरभाषम्। शंकिं वत्स! बहु व्यस्तः असि किं कर्मणि? अविलम्बं सुशीला अवदत्।

'तत् अस्मि मातः इदानीम् अपि गृहपरिवर्तनकारणेन असौविध्यस्य परिसमाप्तिः नैव जातास्ति। एवं करोतु मातः। इतोऽपि कतिपयदिनानि तत्र तिष्ठतु। अहम् आश्रमस्य प्रबन्धकेन सह वार्तालापं करोमि। किमपि असौविध्यं येन न स्यात्। धनं तु प्रत्येकं मासे प्रेषयाम्येव ।' एकेनश्वासेन अनिकेतः सर्वम् एतत् अवदत्।

'किन्तु पुत्र!' किमपि वक्तुकामा आसीत् सुशीला।

श्मातः! अनन्तरं पुनः कदाचित्। इदानीं मम अतीव व्यस्तता वर्तते। अहं पुनः आश्रमेण सह अद्यैव वार्तालापं विधास्यामि। अस्तुश दूरभाषम् अवानाययत् अनिकेतः अपरस्मिन् पक्षे।

'अनन्तरं पुनः कदाचित् । पुनः कदा..' आत्मानम् आत्मनैव पृच्छन्ती आसीत् सा। स्मरन्त्यपि आसीत् तद्दिनं यदा त्रयोदशवर्षदेशीयम् अनिकेतं तस्याः निकटे विहाय अनिकेतस्य पिता दिवं गतः। प्रवेशिकायाः नवमकक्षायां पठन् आसीत् अनिकेतः। विद्यालयस्य उत्तमः मेधावी छात्रः आसीत्। अतः सर्वस्मिन् शून्यतां गतेऽपि सुशीला तस्य उत्तरोत्तरम् अध्ययनमेव अचिन्तयत्। प्रवेशिकायाः अनन्तरम् अनिकेतः नगरं गत्वा महाविद्यालये पठेत् इति धिया तेन सह ग्रामस्य गृहम् अत्यजत् सा। ग्रामस्य कृषिभूमेः क्रमशः विक्रयणं कृत्वा कृत्वा नगरे भाटकगृहे अनिकेतं नीत्वा अवसत् सा। अनिकेतस्य अध्ययने बाधा न स्यात्– इत्येकम् एव लक्ष्यं मनसि निधाय सा पृष्ठं पुनः एकवारम् अपि नैव अपश्यत्। कदापि 'पुनः कदाचित्' इति किं चिन्तितवती सा? नैव। दिनानि, मासान्, वर्षाणि कथम् अतीतानि नैव परिगणितं तया। जीवनस्य लक्ष्य किं, स्वजन्मनः सार्थकता क, स्वस्य व्यसनं च किम् इति किम् अपि कदापि विचारितं तया? केवलम् अनिकेतस्य मुखं दृष्ट्वा पत्युः अवर्तमानता, ग्रामजनपदात्मीयस्वजनानां दूरता स्वस्य आयुषः क्रमशः क्षीणता न कदापि ईक्षिता तया। अनिकेतस्य जागरणेन अथवा ततः प्राक् जागरणं, तस्य स्वप्नेन तदनन्तरे वा विश्रान्तिः तस्याः। प्रतिपलं शीतोष्णसुखदुःखेभ्यः अनिकेतस्य रक्षणम् एव ध्येयम्।

स्वस्य पित्रोः ज्येष्ठा कन्या आसीत् सुशीला। अतीव स्निग्धा। एकदा तयोः नेहबन्धनं त्यक्तम् अपरस्य कस्यचित् गृहशोभायै। क्रूरेण कालेन तदु अपि गृहं छिन्नम् एतस्य बालकस्य वृद्धये समृद्धये। अनिकेतः प्रगतशिक्षाम् अवाप्नोत् । उत्तमवेतनसहितम् उद्योगम् अपि। तस्मिन् दिवसे सुशीला आत्मानम् अबोधयत् मम उत्तरदायित्वं परमेश्वरेण पूर्णतां नीतम्। लघुभाटकगृहं विहाय बृहत्कायं गृहं स्वीकृतम् अनिकेतेन। सुशीला आधुनिकं व्यसनं किम् इति नैव जानाति स्म। अथवा तद् विज्ञातुं तया अवसरः एव कुत्र प्राप्तः? यथा लघुभाटकगृहे तथा बृहद्भाटकगृहे। गृहाद् गृहान्तरं, मार्गात् मार्गान्तरं तस्याः जीवनस्य अन्तरङ्ग एव विषयः आसीत्।

स्वेच्छया स्वानुरूपां सोद्योगां तरुणीं सोमां पर्यणयत् अनिकेतः। उभयोः उद्योगगता व्यस्तता प्रतिदिनम्। कार्यम् एव कार्यम्। अनिकेतस्य आगमने विलम्बः, सोमायाः अपि। कीदृशः कार्यविधिरेषः? न अहः, न च रात्रिः, सर्वदा कार्यम्। यान्त्रिकैः सर्वम्। तथापि एषा रीतिः आधुनिकी।

स्वस्य गृहं भवेत्– सोमायाः विचारः। उत्तमः एव। सुशीला अचिन्तयत्– पुनः 'स्वस्य गृहम्' इति। अनुभवः जीवने समायास्यति। भवतु नाम। पत्युः गृहं तु गतम्। पुत्रस्य गृहं तु स्वस्य एव खलु।

श्रुतं मुख्यनगरे समधिकं मूल्यं दत्त्वा, तदर्थं किञ्चन ऋणम् अपि स्वीकृत्य अनिकेतेन गृहं क्रीतम्। तद् गृहं सुशीलया दृष्टं न। वस्तूनां स्थानान्तरणं भवति स्म। तदानीम् एव अनिकेतः अत्र एकस्य सप्ताहस्य कृते केवलम् इति उक्त्वा सा प्रापिता। इदानीं पञ्चचत्वारिंशत् दिनानि गतानि। एकवारमपि अवसरं नैव प्राप्तवान् अनिकेतः अत्र आगन्तुं मातरं द्रष्टुम् । इदानीं बदति पुनः कदाचित्...।

अशोकधरः प्रकोष्ठस्य दीपम् अज्वालयत्। श्सायङ्कालः अभवत् सुशीलावर्ये! अन्धकारः आगतः। अन्धकारे उपविश्य किं चिन्तयति भवती। हसन् आसीत् अशोकधरः।

श्सत्यं वदति भवान्। सायंकालः आगतः। किन्तु इदानीम् अवगच्छामि– पित्रालयत्यागकाले मम तु प्रातःकाले एव सायङ्कालः आगतः आसीत। तदानीं भ्रान्तिः आसीत् मम-सः कालः दिवाकालः इति। इदानीं सत्यमेव अन्धकारः पुरतः आगतः इति। तां भ्रान्तिम् अद्यैव अवगच्छामि।श अवदत् सुशीला।

'नहि भोः सुशीलावर्ये स्वकीयं जीवनं वयं न जीवामः। केवलं परकीयं जीवनं समुद्धर्तुं यतामहे। किं वयं स्वश्वसनैः जीवितुम् असमर्थाः? किम् आशाप्रतीक्षे विहाय स्वात्मना शान्तिं लब्धुम् अधिकारः नास्ति अस्माकम्?' शनैः अवदत् अशोकधरः । अहसत् सुशीला। अवदत्, श्मम पुत्रः किम् उक्तवान् जानाति? 'पुनः कदाचित्' इति। तस्य कृते तु मया कदापि एकक्षणमपि न चिन्तितम् इदम् श्पुनः कदाचितश इति। यत् अपेक्षितं यदु अनपेक्षितम् अपि तत् तदानीम् एव विहितम। अद्य पुनः मम कृते 'पुनः कदाचित्'...'

– 'तत्र आदौ 'न' इति योजयतु सुशीलाभगिनि ! 'न पुनः कदाचित्' इति । तदेव आश्वासनम्। तदैव शान्तिः ।'

साभार-कथासरित्

७. किरातार्जुनीयम्, २/२७
८. किरातार्जुनीयम्, १४/३
९. नाट्यशास्त्रम्, षष्ठ: अध्यायः
१०. साहित्यदर्पणम्, प्रथमः परिच्छेदः
११. किरातार्जुनीयम्, प्रथमसर्गटीका, पृ. २५
१२. मल्लिनाथटीका, पृ. ११
१३. किरातार्जुनीयम्, १/७-२५
१४. किरातार्जुनीयम्, १/२७, २९-४६
१५. किरातार्जुनीयम्, २/६-२४
१६. किरातार्जुनीयम्, ३/१७-२३, २५, २६
१७. किरातार्जुनीयम्, त्रयोदशसर्गतः अष्टादशसर्गपर्यन्तम्
१८. किरातार्जुनीयम्, १०/१७, ३९-४१, ६०-६२, १४/३२, ६१
१९. किरातार्जुनीयम्, ८/१४, १५, २२, ३७, ४६, ४८, ५१ ९/३६-३७, ३९, ४०, ४२
२०. किरातार्जुनीयम्, १३/३१
२१. किरातार्जुनीयम्, १२/४५, ४७, ४९, १५/१
२२. किरातार्जुनीयम्, १७/७-९, १७/४९
२३. किरातार्जुनीयम्, १८/१६
२४. किरातार्जुनीयम्, १०/४०-४१, ४४-४७, ५०, ५२, ५६
२५. किरातार्जुनीयम्, ३/५-६, १८/२२-४१
२६. किरातार्जुनीयम्, १०/१६, १३/३-१३, १६/२-१९
२७. भारवि काव्य में अर्थान्तरन्यास, पृ. ७७
२८. किरातार्जुनीयम्, १/४, ५, ३०, ३७, ४१-४३, ४५
२९. किरातार्जुनीयम्, ५/३९
३०. किरातार्जुनीयम्, २/३३, १३/१९
३१. किरातार्जुनीयम्, १५/१४
३२. किरातार्जुनीयम्, १५/५, ३८
३३. किरातार्जुनीयम्, १५/१०
३४. किरातार्जुनीयम्, १५/८
३५. किरातार्जुनीयम्, १५/२
३६. किरातार्जुनीयम्, १५/२५
३७. किरातार्जुनीयम्, १५/१८, २०
३८. किरातार्जुनीयम्, १५/१६, ५०
३९. किरातार्जुनीयम्, १५/३५
४०. किरातार्जुनीयम्, १५/५२
४१. किरातार्जुनीयम्, १५/३१
४२. किरातार्जुनीयम्, १५/४२
४३. किरातार्जुनीयम्, १५/७
४४. किरातार्जुनीयम्, १५/२७
४५. किरातार्जुनीयम्, १५/१६, ५०
४६. किरातार्जुनीयम्, १५/४२
४७. किरातार्जुनीयम्, १५/५२
४८. किरातार्जुनीयम्, १/४३
४९. किरातार्जुनीयम्, १६/५९
५०. किरातार्जुनीयम्, १/४३ (केचित् विद्वांसः अत्र गौडीरीतिं मन्वते)
५१. किरातार्जुनीयम्, प्रथमसर्गटीका, पृ. ३०
५२. किरातार्जुनीयम्, १७/६३ इत्यादयः
५३. किरातार्जुनीयम्, १४/३
५४. किरातार्जुनीयम्, ७/१४

साभार-आन्वीक्षिकी

# दिल्ली जलं याचते?



-डॉ. अरविन्दकुमारतिवारी

हं हो! नीतिविधायकाः! जनचिताः श्रीसांसदाः! रक्षकाः!
नेतारो बहुमानिनः! सुखमये धृत्वाऽङ्गुली: कर्णयोः।
चण्डे ग्रीष्मदिने तृषाविगलिता श्रीराजधानी प्रिया
दग्धा शुष्कमुखी न पश्यथ कथं दिल्ली जलं याचते? ॥ १
नो दत्ते सलिलं हिमाचल इति प्रायो वदन्तः पुन
र्नायं रक्षति नो ददाति मुखराः! सर्वेऽपि रे नायकाः!
दोषो नैव परस्परं बहुविधं ब्रूथाऽद्य रे निर्दयाः!
सद्यो रक्षत राजभूमिमतुलां दिल्ली जलं याचते ?। २
सर्वेषां कृतमस्ति नायकवरा! दायित्वमेतन्निजं
नेदं कार्यमये मतं शृणुत रे चौकस्य कस्याप्यहो!
पुत्राः सन्ति सहस्रमेव धनिका यस्या जनन्या परं
साप्येषा निजनेत्रवाष्पसलिलै र्दिल्ली जलं याचते?। ३
धिक्कारो जनतां चिनोति मुदिता या नायकं नाशकं
यं कञ्चित् प्रतिपञ्चवर्षमचला लाभेच्छया स्वेच्छया ।
किन्त्वेषा निजजीवनामृतमृतिं दृष्ट्वा कथं निर्भया
द्वारं नेतृदलस्य यान्त्यसमये दिल्ली जलं याचते? ४
यद्येषा जनता प्रशान्तमनसा संवीक्ष्य सर्वां स्थितिं
नेतारं किल चेष्यतीति न पुनर्दातुं जलं यः क्षमः।
वा त्रातुं सलिलाद् भवेत् प्रतिपलं द्वारस्थितः सर्वथा
को लाभो मतदानतः सहृदया! दिल्ली जलं याचते? ५
दोग्धुं धेनुमिमे चरन्ति निखिला लब्धुं पदं लोभिनः
नो सेवामिह कुर्वते कपटिनो गोपालकाः बन्धवः!
शुष्कं घासमिमे कथं न समये धूर्ताः प्रदातुं गिरां
सज्जाः सन्ति यतो निरन्तरमियं दिल्ली जलं याचते! ६
सङ्गोष्ठ्यै परिविभूयन्ति रमणीरूपश्रिया नायिका-
मेनां नायकपण्डिताः स्वयशसां कान्तिप्रियाः कौरवाः।
तत्पश्चात् रुदतीमिमावहिताः त्यक्त्वा पुनश्चत्वरे
लीना राजपथेषु नायकहता दिल्ली जलं याचते।। ७

## श्रीवैद्यनाथाष्टकम्!

विशाले स्वराष्ट्रे सुलिङ्गानि यानि
जगत्सौख्यकारीणि शम्भोर्लसन्ति।
लसल्लिङ्गमेकं हृदा श्रद्धयैतन्
मया वन्द्यते कामनालिङ्गमेवम्।। १
इदं सिद्धपीठं गिरामर्चकानाम्
इयं पावनी सुस्थली देवतानाम्।
अदृश्या वसन्त्यत्र सिद्धाः प्रसिद्धा
अतो देवगेहस्त्रिलोके श्रुतोऽयम्।। २
कदाचिद् दशास्यो नयन् वैद्यनाथं
स कैलासकुट्याः स्वलङ्कानगर्याम्।
द्रुतं युक्तिरासीद् भवकल्पिता या
प्रभो! लोकनाथ! ध्रुवं तां प्रणौमि।। ३
अये! कामनालिङ्गरूप! प्रभो! मे
प्रसीद प्रसीदाविलम्बं महेश!
सदा सौख्यभोगं ददानो जनेभ्यो
गिरां वर्द्धकेभ्यः समस्तार्चकेभ्यः।। ४
जलं तीर्थसुल्तानगंजात् स्वपात्रे
जनाः स्थापयित्वा भवन्तं जपन्तः।
त्रिकूटाद्रिविल्वप्रसूनैः समर्चां
विधायागताः कामनां पूरयन्ति।। ५
प्रभो! पाहि नित्यं निजं झारखण्डं
परं नो विहारं त्यजैवं विपन्नम्।
त्रिनेत्रं समुद्घाट्य सम्पश्य शम्भो!
धरापुत्रिकामैथिलीवासभूमिम्।। ६
महादेव! वैद्येश्वर! प्रार्थयेऽहं
सदानन्दसन्दोहदा भारती नः।
विहारप्रदेशे प्रिये झारखण्डे
विभो! वर्द्धतां सर्वदा रक्षितेयम्।। ७
अहम्भावरोगज्वरो मामकीनः
चिरात् पीडयन् मां प्रभो! मोदतेऽयम्।
तमाकृष्य हे वैद्यनाथ! त्रिशूलिन्!
कुरु शुद्धसद्भावपूर्णारविन्दम्।। ८
वैद्यनाथाष्टकं भूयाद् भक्तिभावमयं शुभम्।
सर्वदुर्गुणरोगाणामौषधं भक्तकल्पितम्।। ९

# शिक्षा चेत् नेत्रयुक्तोस्ति नेत्रहीनं प्रशासनम्



प्रो. बनमाली बिश्वालः

विश्वविद्यालयस्यैव भवत्यात्मोपि कश्चन।
शैक्षणिकविभागोस्ति स चात्मा नात्र संशयः।।
शिक्षा चालौकिकी लोके लौकिकं हि प्रशासनम्।
स्थानमलौकिकस्यात्र नेतुं किं लौकिकं क्षमम्।।
प्रशासनं च मस्तिष्कं हृदयं शैक्षिकं पुनः।
भावना हृदये यास्तु मस्तिष्के स्युः कथं च ताः।।
शिक्षा चेत् नेत्रयुक्तोस्ति नेत्रहीनं प्रशासनम्।
प्रशासनं विना शिक्षा पंगुवत् निष्क्रिया क्वचित्।।
प्रशासक-प्रशास्याख्यो भावस्तत्र न युज्यते।
पंगन्धन्यायमाश्रित्य तयोः कार्यमपेक्ष्यते।।

## ग्रीष्मानुभवसप्तकम्



-डॉ. सत्येन्द्रपाण्डेयः
सहायकाचार्यः
जगजीवनमहा-
विद्यालयः
(वीरकुंवरसिहविश्व-
विद्यालयः)
आरानगरम्, बिहारः

न खलु न खलु तापः सूर्य! संवर्धयस्व,
सहजसुखदसृष्टौ ते मयूखो दवाग्निः।
क्व शरदि सुमयूखैः तुष्यते सर्वलोकः,
क्व च कठिनरुचस्ते ज्वालने सम्प्रवृत्ताः।।1।।
कथमिह पशुयूथाः भोजनं विस्मरन्तः,
अधितरु निवसन्तो स्निग्धबिम्बं श्रयन्ते।
तृषितमपि न किञ्चित्पीयते तप्तमम्भः,
कथय दिनकर! त्वं बुध्यसेऽव्यक्तवाचम्?।। 2।।
तव गुरुतरतापात्प्रायशः शून्यमार्गः,
लघुविहगवराकाः नोत्पतन्त्यभ्रभागे।
सदनमपि वसन्तः के नराः यान्ति शान्तिं,
क्षणमपि न वियोगो विद्युतश्चोत्सहन्ते।।3।।
बहुतरनिजकार्यं सम्परित्यज्य गेहे,
तव वशमुपयातो मूर्ध्नि हस्तौ दधानः।
निवसति मनुजोऽसौ किं प्रकुर्यान्न बोधः,
बत हृदयतले किं नास्ति भक्ताय खेदम्?।। 4।।
बहुकृतमनुरूपं चेतसः साम्प्रतन्ते,
परिहर निजतेजो वारिदं प्रेषय त्वम्।
अनुसरसि न याञ्चां शीघ्रमेवांशुमालिन्!,
अशुभमिह च भूयो जायतां सर्वदेशे।।5।।
अनवरतशरीरात्स्वेदधाराः स्रवन्ति,
बहुकृतजलपाने नो तृषा शान्तमेति।
सकृदशनकृते नो बाधते सम्बुभुक्षा,
क्वथितसलिलराशौ मज्जनं जायतेऽहो।।6।।
वहति पवनदेवो तप्तवातेषु भूमौ,
दहति दहनदेवो काननं पर्वतेषु।
तपति तपनदेवो मानुषं गह्वरीषु,
जलधर! अधुनाऽहं त्वत्कृपामात्रमीहे।।7।।

## श्रीद्वादशज्योतिर्लिङ्गस्तोत्रम्



-ईशान तिवारी
व्याकरण विभाग
काशी हिन्दू विश्वविद्यालय।।

हे सोमनाथ दिगम्बर!
कुरु सज्जने सुखवर्षनं
हे मल्लिकार्जुन मङ्गल!
कुरु सज्जनस्य सुपालनम् ।
महाकाल भस्मविभूषित!
कुरु सज्जनस्य सुरक्षणं
ममलेश्वरेश्वर सुन्दर! कुरु
सज्जन-मति-वर्धनम् ।।

हे वैद्यनाथ सुधाधर!
कुरु सज्जनायुर्वर्धनं
हे भीमशङ्कर पावन!
कुरु सज्जन-बल-वर्धनम् ।
हे रामनाथप्रियेश्वर!
कुरु राम-भक्तिः सच्चित्ते
नागेश्वर करुणेश्वर!
करुणां कुरु प्रियसज्जने।।

काशीश्वर विश्वेश्वर!
निजराज्यसौख्यं देहि ते
हे त्र्यम्बक त्रिगुणात्मक!
त्रिवर्गफलमहो देहि ते ।
हिमवासक हर नायक!
हर सज्जनस्य कुलक्षणं
घुश्मेश्वर जनपालक
प्रभो! दुर्जनं कुरु सज्जनः।।

# उलूकस्य नेत्रम्



डॉ.तारेशकुमारः शर्मा,
रा. व. मा. बालः वि.
लिबासपुरम्,
दिल्लीनगरम्-११००४२

१. लोलुपलोकतन्त्रे ननु द्रव्यहीनजीवने।
चाटूक्तिः साधिताजस्रं पादसेवा ततोऽधिका।।
नार्जिता खलु संसिद्धिर्न हि लब्धा पदोन्नतिः।
कोककाकारिवद् मत्वैवं तु तिष्ठति साम्प्रतम्।।

२. मन्त्रिणः साहचर्यं हि क्षुद्रनीतेश्च सन्निधिः।
उत्कोचो लिङ्गमर्थञ्च चाटूक्तिर्भ्रष्टता तथा।
प्रज्ञापङ्गुः क्रियाहीनो खलु देहसमर्पणम्।
चयनस्यानवच्छेदे दैवाकलन- हेतवः।

३. भविष्यति कलौ युगे तु निखिले धरित्रीतले,
प्रभो कमलनाभिजं हि विषयी पुरा पृष्टवान्।
प्रणम्य ननु दण्डवत् विषयसारभूतं कथं,
ददे स्व ललना तथा मधुमधुश्च तेनोत्तरम्।।

४. त्वमसि मुखशोभा गन्धोत्तमे! हृदयहारिणि!,
नयनसुखदे! मत्प्राणः त्वमेव च दिवानिशम्।
जटिलदिवसाः नूनं त्वां विना न खलु यान्ति मे,
सपदि भव कण्ठेऽऽश्लिष्टो हि तेन समये मुदे।।

५. ध्वस्ताचारनरस्य गर्हितधनैरुत्कोचदक्षस्य वा,
सादृश्यं तु कथं हि शीलशशिनो निःस्वस्य भद्रं भवेत्।
उद्वाहे दुहितुः यतो हि सुकृतः हेम्नः खनौ कार्मिकः,
पिङ्गं यच्छति कर्णवेष्टवलयं श्रद्धास्थिरैः पाणिभिः।।

# वायसः



-महेशनारायणशास्त्री
कुरेडा, टोङ्क,
राजस्थानम्

पूर्वजैर्मे शिलाखण्डान्
क्षिप्त्वाल्पजलकुम्भके।
पातुं तदा जलं प्राप्तं
कश्चिद् विचिन्त्य वायसः।।
दुर्गुऽपि तथा कर्तुं
तृषितो वायसो हृदा।
अस्थापयच्छिलाखण्डान्
चौकैकं कुम्भके मुदा।।
अश्मखण्डभृतः कुम्भः
परं नीरं न लब्धवान्।
आशाबन्धस्तदा भग्नः
काकस्य सर्वतोऽभवत्।।
पिपासादुःखितः काकः
क्रुद्ध्वा वचनमब्रवीद्।
हा हन्त!वञ्चितोऽहन्तु
पूर्वजैर्मामकैर्भृशम्।।
एवमाक्रुश्य वै भूमौ
ताडं ताडं शिरो निजम्।
काकस्तृषाक्षताभ्याञ्च
कालाननं प्रयाति हा!।।



## श्रीगङ्गामाहात्म्यम्



-संस्कृति चतुर्वेदी
शोधच्छात्रा, साहित्य - विभाग
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत
विश्वविद्यालय, नवदेहली

राज्ञः बलेः माननिवारकस्य बटुस्वरूपस्य कलामयस्य ॥
लक्ष्मीपतेः पादनखाग्रभागात् समुद्भवा विष्णुपदी प्रसिद्धा ॥१
सप्रश्रयं पादपयः मुरारेः कमण्डलौ स्वीकृतवान्विधाता।
कालेन प्राप्तं रमणीयरूपं जलं हि तद्गेगमयं स्वरूपम् ॥२
कल्लोलयुक्तामनियन्त्रितां तां समुच्छलन्तीं सुविशालधाराम्।
गम्भीरकोलाहलभ्राजमानां नियन्त्रितुं वेदमुखः प्रवृत्तः ॥३
धाता तदा तामतिवेगयुक्तां कमण्डलौ प्राप्तनदीस्वरूपाम् ।
गङ्गेति नाम्ना व्यवहारभाजां सुरेश्वरीं पालितवान्समोदम् ॥४
सगरस्य राज्ञः स्वजनान्विमोक्तुं भगीरथः राधितवान् प्रजेशं।
आराधनायाः फलदातुकामः मुनीश्वरः प्रश्नमिमञ्चकार ॥५
घोरं नदन्तीं बहुवेगशीलां रौद्रस्वरूपां स्खलितोर्मिमालाम् ।
सोढुं क्षमो यो ननु मर्त्यलोके, न दृश्यते प्रार्थय नीलकण्ठम् ॥६
भक्तार्तिहारी त्रिपुरान्तकारी कपर्दमध्ये ग्रथितप्रवाहाम्।
गङ्गां शुभां तत्र विमुच्य शम्भुः भगीरथेऽनुग्रहवान् बभूव ॥७।
स्रोतस्विनी या सुरदीर्घिकाख्या अभूत्मुदा भूमिपथे सुरम्या।
उत्तुङ्गधारासहिता च गङ्गा हिमाद्रिजाता शुभदास्तु सा नः ॥८।
पञ्चप्रयागान्वितदेवधारा सुरेश्वरी क्षेमकरी त्रिधारा।
काशीपतेः शीशविहारिणी सा भवेत्सदा सौख्यकरी समेषाम् ॥९
लोकोपकर्जीं विमलां विशालां तरङ्गिणीं कल्मषहारिणीं तां।
नक्रासनां शैलसुतां शुभाङ्गीं नमामि गङ्गां भवपापहर्जीम् ॥१०
गायामि ते नाम सुधा समुद्रं भजामि नित्यं तव कीर्तिराशिम् ।
एतान्वरान्देहि कृपामयी मे कृतिर्मदीया तव पादपद्मे ॥११ ॥
इति श्रीगङ्गामाहात्म्यं सम्पूर्णम् ॥

।।श्री।।

# लोकतन्त्रम्

प्रणेता
**डॉ. अरविन्दकुमारतिवारी**
अमरवाणीकविपरिषद्, बागपतम्, उत्तरप्रदेशः

(प्रथमोऽङ्कः)

नान्दी

लोकतन्त्रं जयेल्लोके सर्वमानवसौख्यदम्।
महतां निर्मितं श्रेष्ठं जनतोन्नतिकारकम्।। 1

(ततः प्रविशति सूत्रधारः)

सूत्रधारः- अये! कुतो ध्वनिरयं श्रूयते?

(कर्णं दत्वा)

भारतस्य विकासाय दमनाय द्विषां सदा।
सर्वैर्जागरितैभाव्यं मतदानसमागमे।। 2
मतदानं प्रदातव्यं नेत्रे तस्मै महात्मने।
सेवते नितरां देशं निद्रां त्यक्त्वा दिवानिशम्।। 3

आत्मगतम् अहो! स्वदेशे निर्वाचनं समारब्धमस्ति। विचरन्ति नेतारः। उपसृत्य कोलाहलमाकर्णयामि।

अये एष नवीनो दलो निजध्वजं हस्ते कुर्वन् राजमार्गं पीडयतीव। अस्तु सावधानतया अस्य गर्जनं श्रृणोमि।

अस्माकं को भवेन्नेता उपानच्चिह्नवान् प्रियः।
अस्माकं को भवेन्नेता उपानच्चिह्नवान् प्रियः।
बुद्धम्! अयम् उपानहच्चिह्नवतो नेतुः दलो वर्तते।
अस्य भाषणं घोषणापत्रं च श्रोतुम् एनमनुसरामि।

सज्जो मञ्चः। उपविष्टाः केचित्।

सञ्चालकः- भ्रातरो भगिन्यः! अवगच्छन्ति सर्वे भवन्तो यत्, अस्माकं देशे निवार्चनमारब्धं वर्तते। अद्य अस्माकं समक्षं मञ्चे कर्मठो युवा विचारशीलो नेता आगतो वर्तते। अहम् अविलम्बम् एनं महोदयम् आह्वयामि यत् भवन्तः स्वदलस्य विचारं प्रकटीकुर्वन्तु। तालिकावादनेन स्वागतं क्रियताम्।

(राष्ट्रवाददलस्य नेता रमेशः भारतीयवेषभूषया शोभमानः समुत्तिष्ठन् नाट्येन सर्वान् पश्यन् प्रणमति।)

रमेशः- मम प्रणम्या बन्धवः कृषकाः! निर्वाचनमतिसन्निकटं समागतं वर्तते। भवतां समयं बहुमूल्यं मत्वा अहं साररूपेण विज्ञापयितुम् इच्छामि। यतोहि बहुषु स्थलेषु गन्तव्यमस्ति। विदन्ति भवन्तो यत् सर्वे दलाः विजयार्थं प्रयतमाना विलोक्यन्ते। अस्माकं नवीनोऽयं दलः देशस्य सर्वेभ्यो नागरिकेभ्यः सर्वमपि वस्तुजातं यथा अन्नं जलं दुग्धं रेलयानसेवा वायुयानसेवा औषधं किं किं वदानि। सर्वमपि निश्शुल्कं प्रदास्यति। यदा अस्माकं विजयो भविष्यति। अस्माकं हस्ते शासनसत्ता आगमिष्यति। अतः भवन्तः प्राथ्यन्ते यदस्मभ्यः मतं प्रदाय स्वेच्छां पूरयन्तु सानन्दं देशे जीवनं यापयन्तु।

(जनास्तालिकां वादयन्ति जनसम्मर्दादेको युवा उत्थाय)

अरविन्दः - श्रीमन्! किमहं प्रष्टुं शक्नोमि? यद् भवान् सर्वं निश्शुल्कं कथं दातुं शक्नोति। अनेन जनता अलसा भविष्यति। न किमपि कार्यं कर्तुं प्रभविष्यति। तदा देशस्य विकासः कथं भवितुं शक्ष्यति?

रमेशः- सत्यं वदसि युवन्! त्वं मम अभिप्रायं नावगच्छसि। मम वक्तव्यं यद् भोजनार्थं विलासार्थमेव सर्वो जनो यतते। तदहमेव दास्यामि तेन का हानिः?

औषधार्थं च भोज्यार्थं जनता याति गेहतः।
तदहं यदि दास्यामि निश्शुल्कं तेन किं तव।।4

त्वमपि मह्यं स्वमतं देहि, अहं तुभ्यमपि दास्यामि निश्शुल्कम्।

अरविन्दः- नैव धीमन्! नैव । नाहमलसशिरोमणिर्भवितुम् अभिलषामि।

अहं तु तस्मै मतं प्रदास्यामि यस्य शासने भोजनादिकं मिलतु स्वल्पं किन्तु देशसेवा तस्य व्रतं स्यात्। भवतां भाषणे देशसेवाशब्द एव न श्रुतो मया।

रमेशः- अस्तु युवन्! तव देशभक्तिवर्धताम्। यदा उदरे अन्नकणो न गमिष्यति तदा ज्ञास्यसि यत् का देशदेशभक्तिः।

अरविन्दः- सीम्नि शत्रु दहेद् योऽसौ सैवास्माकं मतो दलः।
मानसं न दलं कञ्चिच्चान्यं कामयते मम।। 5
न मिलेद् भोजनं नेतः किन्तु देशस्य रक्षणम्।
सेवनं शासकः कुर्यात् तत्कृते सुमतं मम।। 6

रमेशः- अस्तु! अयं देशसेवां रटति। समर्थकाः! वयमन्यत्र चलामः।

(समर्थका वदन्तो यान्ति।)

अस्माकं नेता कीदृशो रमेशभ्रातुः सदृशः।
अस्माकं नेता कीदृशो रमेशभ्रातुः सदृशः

(द्वितीयोङ्कः)

अरविन्दो गृहमागत्य चिन्तित आसीनो दृश्यते। तस्य भार्या चिन्ताकारणं पृच्छन्ती ब्रूते

मणिकर्णिका- स्वामिन्! कथमेवं चिन्ताकुलोऽसि? किं जातम्? मामपि सहगामिनीं ज्ञापय।

अरविन्दः- मणिकर्णिके! एकस्य नेतुः अनर्गलं भाषणं श्रुत्वा दूयते मे मनः।

मणिकर्णिका- असौ किमभाषत?

अरविन्दः- मतं याचमानः असौ रमेशः उपाहच्चिह्नः मञ्चमारूह्य जनतां वञ्चयति वचनैः। वदति यत् अन्नं जलं औषधं सर्वमपि निश्शुल्कं प्रदास्यति। निर्वाचने जयं प्राप्य शासको भूत्वा।

मणिकर्णिका- अहो! वञ्चकोऽयं मृदुजनतां मतदानार्थमाकर्षति। स्वामिन् जनता प्रबुद्धा अस्ति। सा सर्वमपि वेत्ति । अतश्चिन्ता न कार्या। यथासमयं जनचितो नेता शासको भूत्वा देशं सेविष्यते।

अरविन्दः- सत्यं भाषसे! प्रिये! जनतापि निश्शुल्कशब्दश्रवणेन प्रसन्नतामावहति। इयं नेतृवञ्चिता यदि साधुं सज्जनं देशसेवकं न चेष्यति तदा पञ्चवर्षं यावद् रोदिष्यति।

अत्रान्तरे समायाति अष्टादशवर्षीया वन्दना अनयोः सुपुत्री। या प्रथमं मतं प्रदातुमुत्सुका दृश्यते।

वन्दना- मातः! पितः! अद्य प्रसीदामि विज्ञाय यदहमस्मिन् निवार्चने कस्मैचिद् देशसेवकाय स्वकं प्रथमं मतं प्रदास्यामि। भवतोः किमभिमतम्? मया कस्मै स्वमतं देयम्?

अरविन्दः - पुत्रिके! त्वमसि सुबुद्धा। त्वत्सदृशा एव युवत्यो युवान एव अस्मान् बोधयेयुः। अस्माभिः किं करणीयम्?

वन्दना- पितः! भवानेव मां पाठितवान् यत् भगवान् श्रीरामः लंकायामुक्तवान् यत् जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। अतः जन्मभूमेः मातृभूमेः सेवायै यः कोऽपि दलः सर्वमपि भेदभावं विहाय प्रतिज्ञां करोति। तस्मै एव अस्माकं परिवारस्य मतदानमस्तु।

मणिकर्णिकाः - मम मुखस्य वचनमनया कथितम्।

अरविन्दः! - इयमस्ति अरविन्दस्य पुत्री, सदा पितृसदृशमेव चिन्तयति। त्वमेव यदा कदा विपरीतं यासि।

मणिकर्णिका- मन्दं हसन्ती भवांस्तु सर्वदा मामेवमेव भाषते । किन्तु अहं सर्वप्रथमं देशभक्ताय दलाय स्वमतदानं करिष्ये।

दूरभाषघण्टिाध्वनिः समुत्थितो भवति
मम देशमहीयं स्वर्णं यच्छति यच्छति रत्नं सर्वम्।
मम देशमहीयम्।

दूरभाषेण वार्तां कुर्वन् प्रविशति विंशतिवर्षदेशीयो रविः।

अयं मातरं पितरं भगिनीं पश्यन् दूरवाणीवार्तां स्थगयति।

रविः- पश्चाद् वार्तां करोमि। इदानीं गृहमागतोऽस्मि। मातरं वन्दे पितरं वन्दे।

अरविन्दः- अये देशभक्त पुत्र! मातरं वन्दे इति प्रथमं प्रोच्य पितरं वन्दसे। किमर्थमिति जिज्ञासते मनो मे।

रविः- पितः! यदि श्रोतुं जिज्ञासते भवान् तर्हि श्रूयताम्-

सद्यः स्वदेशजनताहितरक्षणाय
निर्वाचनं भवति श्रूयत एव सर्वैः।
व्यग्रा गृहात् प्रचलिताः अभियाचमानाः
नेतार एत इह कं न नमन्ति रागात्।। 7
किन्तु
प्रदास्ये स्वमतं नैजं यस्मै कस्मै पितः! प्रियम्।
यो जित्वा भारतं देशं पश्यत्येव न शासकः।। 8

वन्दना- बहु सुन्दरं भ्रातः! साधु समुद्घोषितं त्वया। अहमपि त्वामनुसरामि।

रविः- हे पितः! अवगतो वन्दे मातरम् इत्यस्य भावो भवता।

अरविन्दः- ओं पुत्र! वर्धतां ते देशानुरक्तिः। चिरञ्जीव।

रविः- एकदा मातरं चैनां जह्यां शक्तः पितर्मम।
मातृभूमिमहं नैव त्यक्तुं स्वप्नेऽपि कामये।। 9

मणिकर्णिका- आयुष्मन्! अद्य मे दुग्धपानफलमवाप्तम्। देशभक्तं सुतं प्रसूय अहं गौरवमनुभवामि। किं वा मन्यते स्वामिना?

अरविन्दः- मणिकर्णिके! हृदयं प्रफुल्लम् इदानीं मदीयम्। त्वत्समाना भवन्तु सर्वेऽपि युवानः। आयुष्मान् त्वामभिनन्दामि। चिरं जीव। देशं सेवस्व।

वन्दना- नाट्येन रुदती सर्वे रविमेव प्रशंसन्ति।

अरविन्दः- पुत्रि!

यस्याः स्यात् परिवारेऽयं देशभक्तः सुतो रविः।
वन्दना सा कथं नैव वन्दनीया मुहुर्मुहुः।। 10

आयुष्मति! त्वमपि भ्रात्रा साकं स्कन्धेन स्कन्धं नियुज्य स्वसुहृदो बोधयेः, यत् स भ्रमितो न भवेत्। न कश्चित् ते सखा जातिवादं मत्वा मतं दद्यात्। न च कश्चित् निश्शुल्कं सर्वं मिलिष्यतीति भावनया मतदानं कुर्यात्। बहवो मद्यादिनापि मतदानाय आकृष्यन्ते। तेऽपि बोद्धव्याः यत् नैतत् सभ्यनागरिकस्य कर्तव्यम्। अस्तु अहं तावद् ग्रामसभायां गच्छामि। तत्र रात्रौ अष्टवादने निर्वाचनविमर्शो वर्तते।

(रविर्वन्दना च पितरं प्रणमतः। निर्गच्छति अरविन्दः।)

(तृतीयोङ्कः)

(ग्रामसभायां जनाः उपविष्टाः सन्ति। कश्चित् धूमवर्तिकां पिबन्दृश्यते। कश्चित् तमाखूं नखेन भिन्दन् निर्वाचनवार्तां कुर्वन् विलोक्यते। अरविन्दं समागतं दृष्ट्वा हृष्यन्ति। )

अरविन्दः- प्रणमामि आर्यमिश्रान्! आगमने विलम्बो जातः। क्षन्तव्योऽस्मि श्रद्धेयवृद्धैरहम्।

सुदामा- न कश्चिद् विलम्बो जातः। अस्माकं विश्वास आसीद् यद्भवानागमिष्यति अस्मान् निदेक्ष्यति च।

मंगलदेवः- त्वमेव अस्मासु विज्ञोऽसि। कथय किं करणीयम्? दूरदर्शने सर्वेष्वपि चैनलेषु श्रावं श्रावं वयं खिन्ना भवामः। एते नेतारः तेषां प्रकारः स्वप्रशंसाम् अन्यस्य निन्दां कुर्वन्तो भ्रामयन्ति। ग्राम्यानामस्माकं मतिः सम्यक् न चिनोति कमपि दलम्।

अरविन्दः- तात! न भवता चिन्तनीयम्। भवांस्तु सप्ततिवर्षकल्पः। सर्वमपि दृष्टवान् अनेन चक्षुषा। सप्ततिवर्षेषु किं किं जातमिति को न जानाति। अतः भवतां हृदयं यं कमपि दलं वृणुते तस्मै मतदानं कार्यम्। भवतां मताधिकारो बहुमूल्यो वर्तते। विचार्य देयम्।

शम्भुनाथः- सत्यं वदसि। किन्तु केचन मद्यं द्रव्यं दर्शयन्ति। किं करणीयम्? अस्माकं मनस्तु तत्र रमत एव न। अस्माभिस्तु चिन्तितमस्ति यत्

क्षेत्रं जातिं समालोक्य न दास्ये स्वमतं सुत!
देशभक्ताय मे नूनं सुमतं वर्तते ध्रुवम्।। 11

विपुलः- अस्माकं मनोवृत्तमुक्तम्।

अहमपि एतदेवाभिलषामि,
किं सत्यं किमसत्यं वा प्रोच्यते नेतृभिः सदा।
तत्सर्वं तु विजानीमो ग्रामीणा नागरा इव।। 12

अरविन्दः- बुद्धिमन्तो वन्द्या मम ग्रामीणाः! भवतां विचारं श्रुत्वा मोदते मदीयम् अन्तःकरणम्। सर्वमपि कार्यं समयेन सम्पाद्य मतदानदिने समयेन गन्तव्यम्। किञ्च स्वेच्छया देशोन्नतिकारकाय कस्मैचिदपि दलाय स्वमतं प्रदेयम्। येन देशे स्वस्थशासनं भूयात्। सर्ववर्गस्य समुचितो विकासो विलसेत्, दरिद्रता शून्यतां गच्छेत्, सुशासनं वर्धताम्, कुशासनं क्षीयताम्।

अत्रान्तरे रविरव आकर्ण्यते। सर्वे सविस्मयं तद्ध्वनिमार्गं द्रष्टुं लग्ना भवन्ति। भगिन्या मात्रा साकं सभायां सर्वतः पृष्ठे स्थितो रविर्दृश्यते।

रविः-

लोकतन्त्रं जयेल्लोकतन्त्रं जयेत् भारते सर्वदा लोकतन्त्रं चरेत्।
देशभक्तो भवेच्छासकः सर्वदः शत्रुसंहारकः सर्वसम्मानदः।।13
सर्वभेदो विनश्येत्स्वदेशाद् ध्रुवं भारते पुष्पितं स्यात् सुमं सौख्यदम्।
भारतीयैकता राजतां भारते भारतीयो जनो वद्धतां सन्ततम्।। 14

मणिकर्णिकाया साकं सर्वे वन्दे मातरं , वन्दे भारतम्, वन्दे लोकतन्त्रं, वदन्ति। ततो वन्दना ब्रूते-

भरतवाक्यं

कन्यकारक्षणं कन्याशिक्षणं कन्यकानां भवेदादरो भारते।
देशभक्तिर्जयेत् देशभक्तो जयेत् चन्द्रिका नः गृहे द्योततां कामये।। 15


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवन सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249** 02.12.2006

## दसदिवसीयसंस्कृतप्रबोधनवर्गः सम्पन्नः

# भारतम् अवज्ञातुं संस्कृतस्य अवगमनम् अत्यावश्यकम्-वाचस्पतिमिश्रः

मथुरा (रामदास चतुर्वेदी) संस्कृत भारती ब्रजप्रांत द्वारा सरस्वती शिशु मंदिरे कमला नगरे आयोजितस्य दश दिवसीय आवासीय प्रबोधन वर्गस्य समापन समारोहे मुख्यवक्ता पश्चिमी उत्तर प्रदेश क्षेत्रस्य संयोजकः




उत्तरप्रदेश संस्कृत संस्थानस्य पूर्व अध्यक्षः डॉ वाचस्पति मिश्रः स्व संबोधने कथितवान् यत् भारतीय संस्कृतिं, सभ्यतां संस्कारांश्च सुरक्षितान् कर्तुं संस्कृत भाषां प्रति अवश्यं युवानः जागरणीयाः । तेनोक्तं भारत वर्षम् अवगन्तुं संस्कृत भाषायाः ज्ञान प्राप्तिः अत्यावश्यकी कार्यक्रमस्य अध्यक्षतां कुर्वन् डॉ भीमराव अम्बेडकर विश्वविद्यालयस्य कुलपतिः प्रो डॉ आशुरानी स्वसंबोधने कथितवान् यत् संस्कृत भारती ब्रजप्रांत द्वारा संस्कृत भाषां जनसाधारण भाषारूपेण प्रतिष्ठापयितुं प्रयासः कृतः इति प्रशंसनीयः।

प्रबोधन वर्गस्य उद्देश्यं प्रकाशयन् संस्कृत भारती ब्रजप्रांत मंत्री धर्मेन्द्र कुमार अग्रवालः कथितवान् यद् भारतीय संस्कृतिं नाशयितुम् आङ्ग्लैः युवसु संस्कृत भाषां प्रति भ्रमः उत्पादितः।

कार्यक्रमस्य मुख्यातिथिः प्रसिद्ध उद्योगपतिः पूरन डावरः कथितवान् देववाणी संस्कृतभाषा सरला मधुरा च वर्तमाने संस्कृत भाषा केवल पूजा पाठं यावत् न सीमिता । एषा ज्ञानस्य विज्ञानस्य च भाषा रुपेण स्वीक्रियते ।

कार्यक्रमस्य शुभारंभम् अतिथयः सरस्वत्याः भारतमातुश्च चित्रे माल्यार्पणं दीपं प्रज्वल्य कृतवन्तः।

प्रशिक्षार्थिभिः सरस्वती वन्दना प्रस्तुता। शिक्षक रुद्रप्रताप सिंहः संस्कृत ध्येय मंत्रस्य पाठं कृतवान्।

कार्यक्रमे संस्कृत भारती ब्रजप्रांत संगठन मंत्री नरेन्द्र भागीरथी वर्गविषयिणीं सूचनां दत्तवान् यत् ब्रजप्रांते 08 जनपदेभ्यः 52 शिविरार्थिनो भागं गृहीतवन्तः। शिक्षणप्रमुखा राधा शर्मा शैक्षिक सत्राणाम् इतिवृत्तम् अपठत्।

समापन समारोहे संस्कृत भारती ब्रजप्रांत न्यास सचिवः गंगाधर अरोड़ा, हरस्वरुप यादवः, आचार्यः नारायण चतुर्वेदी च आवासः, भोजनं, जलपानं इत्यादिव्यवस्थां कृतवन्तः। प्रशिक्षण वर्गे लक्ष्मीनारायणः ,हरीश चन्द्रः, रुद्रप्रताप सिंहः, देवव्रत सिंह तोमरः, , आरती राजपूतः पूर्णतया समयं दत्वा प्रशिक्षणं दत्तवन्तः।

समापन समारोह संचालनं प्रांत शिक्षण प्रमुखः सतीश शर्मा कृतवान्। धन्यवाद ज्ञापनं वर्गाधिकारी रघुवीर सिंहः कृतवान् समारोह समापनं कल्याण मंत्रेण जातम्।






# भारतीयज्ञानपरम्पराविषयिणी गोष्ठी गुरुकुले सम्पन्ना

एटा (डॉक्टर बृजेश गौतमः )13 जून 24 तमे दिनाङ्के द्विदिवसीय गोष्ठी समायोजिता । तत्र प्रथम दिवसे सत्रत्रयं जातम् । डॉ सुरेश चन्द्र शास्त्रिणोप्पऽध्यक्षतायां डॉ शुचिषद् मुनेर्मुख्य वक्तव्यम्- 'भारतीय ज्ञान परम्परायां विहंगम दृष्टि' जातम् । तेन वेदस्य वैदिक वाङ्मयस्य च विभिन्न पक्षाणां गहन परिचयः




कारितः। तत्र कुलाधिपतेः डॉ वागीश आचार्यस्य सान्निध्यं प्राप्तम्। तेन आर्ष परम्परायाः सहज बोधः कारितः ।

डॉ अवनीश कुमारेण गोष्ठी प्रस्तावना उपस्थापिता। राष्ट्रिय कविः संदीप शजरः ने कुशल सञ्चालन किया।आचार्य विद्याव्रत कुमारः, डॉ भीष्मदेवश्च गुरुकुलीय विद्यार्थिभिः सह वक्तृष्णाम् अन्येषां प्रतिभागिनां च स्वागतम् अकरोत्। हेमकुमार विद्यावाचस्पतिः, डॉ हरिदेव आर्यः, डॉ सोहन कुमारः,डॉ लोकेन्द्र कुमारः, डॉ रामपाल आर्यः, नियमदत्त शास्त्री, अक्षय कुमारः, रामनिवास शास्त्री (स्नातकाः /भूतपूर्वच्छात्राः आर्ष गुरुकुल यज्ञतीर्थम्, एटा ) उपस्थिताः।

'गुरुकुल शिक्षा पद्धतेः भारतीय ज्ञान परम्परायां योगदानमिणि' विषये प्रो सुरेन्द्र कुमारस्य (महर्षि दयानन्द विश्वविद्यालयः,रोहतकम्) मुख्यं वक्तव्यं जातम्। कुलपतिः प्रो ओमनाथ बिमली स्ववक्तव्ये दार्शनिके आधारे शिक्षां भारतीय परम्परां च अभिव्यक्तीकृतवान्।

द्वितीये सत्रे अध्यक्षतां कुर्वन् डॉ वागीशः सामाजिक स्तरे व्याप्त शैक्षिक विसंगतिषु पारंपरिक पद्धत्या तुलनात्मक विवेचनम् अकरोत।सम्भावनां च व्यक्तीकृतवान् यत् कथंचित् इयं परम्परा जीवेत्तदर्थम् अनवरत प्रयत्नं कुर्याम।शिवस्वरूपः, अध्वरेश कुमारः, ब्रह्मप्रकाशः, गणेश शास्त्री,अमितश्च व्यवस्थायां सहयोगम् अकुर्वन्। डॉ हरिदेव आर्यः सर्वेभ्यः धन्यवादं व्याहृतवान्। स्नातक पुनश्चर्या शिविर संयोजकः डॉ ब्रजेश गौतमः सर्वेभ्यः आभारवचनं व्यक्तीकृतवान् ।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।